

دو [illegible] ۱۰ برس [illegible] [illegible] اور [illegible] ۱۸ [illegible] برس	[illegible] جبانا [illegible] فالان	فالان
[illegible] [illegible] [illegible] برس	[illegible]	[illegible]
[illegible] [illegible] اور [illegible] [illegible]	[illegible]	[illegible]
[illegible] [illegible] [illegible] [illegible] برس	[illegible]	[illegible]

[illegible]

[illegible]

[illegible]

ॐ अ भ्रा न भ्रष्ठ ङि ङि न आ

ॐ जयंति मंगला काली भद्रकाली कपालिनी दुर्गा
क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तुते १ ॐ शिरो
रक्षे कुमारिक्षि मुद्रं महेश्वरी तथा श्रीवां रक्षतु कौ
मारी हृदयं रक्षतु वैष्णवी २ वाराही नाभिदेशं तु ऐं
द्री गुह्यं रक्षतु चामुंडा जानुदेशं तु पादं नै [illegible]
सर्वकं ३ ॐ अंगप्रत्यंगसंधिश्च सर्व रक्षतु माता
४ ॐ जातवेदसे सुनवाम सोममरातीयतो नि द
हाति वेदः स नः पर्षद् अति दुर्गाणि विश्वा नावेव सिंधुं
दुरितात्यग्निः इति मूल ऋः [illegible] न्या ॐ जातवे
त्यास्य वेदनैर्ललाटे सोमः [illegible] ॐ मंत्र [illegible]
यं [illegible] ति [illegible] यत् [illegible] [illegible]
[illegible] [illegible] नः [illegible] [illegible] हृदि

२ दुर्गा०

ग्रतिस्तनयोः कुकुद्दौ गात्रिनाभौ विश्वापवेद मा
कपाली स्वच्छमलयोः सिंधुः शिलि कुःकसं इति
ऊर्वीः ग्रतिजंघयोः ग्रग्निःपादयोः इ. न्यू सै सं
ओं ह्रां हृदयायनमः ओं ह्रीं शिरसेस्वाहा ओं ह्रूं शिखा
यै वषट् ओं ह्रैं कवचायहुं ओं ह्रौं नेत्राभ्यां वौषट्
ओं ह्रः ग्रस्त्रायफट् ओं ह्रां ग्रंगुष्ठाभ्यां नमः ओं ह्रीं
तर्जनीभ्यां नमः ओं ह्रूं मध्यमाभ्यां नमः ओं ह्रैं ग्र
नामिकाभ्यां नमः ओं ह्रौं कनिष्ठकाभ्यां नमः ओं
ह्रः करतलकरपृष्ठाभ्यां नमः इति र सः ओं
ह्रीं श्रीं गणपतये नमः ओं ह्रीं श्रीं क्षेत्रपालाय नमः
ओं ह्रीं श्रीं तीक्ष्णदंष्ट्राय नमः ओं ह्रीं श्रीं वनस्पतिपु
त्राशिंकाय नमः इ शा प ओं गुरुवे नमः ओं प
रमाचार्याय नमः ओं परमेष्ठिने नमः ओं श्रादिसिद्ध
नमः इ गु प ओं ह्रीं श्रीं दैवसेवे नमः ओं ह्रीं श्रीं

अनेन मंत्रेण प्रयोगांते बलिं दद्यात्

वै प्रम्लै नमः ॐ ह्रीं श्रीं रुद्रायनमः ॐ ह्रीं श्रीं रुद्रायै
नमः ॐ ह्रीं श्रीं वृषभाय नमः ॐ ह्रीं श्रीं वृषभायै नमः
६ पू ॐ ह्रीं श्रीं कौमार्यै नमः ॐ ह्रीं श्रीं वारा
ह्यै नमः ५ नै ॐ ह्रीं श्रीं वाराह्यै नमः ॐ ह्रीं श्रीं
... कायै नमः ॐ ह्रीं श्रीं महालक्ष्म्यै नमः ६ प ...
ॐ ह्रीं श्रीं चामुंडायै नमः ॐ ह्रीं श्रीं चंडमूर्त्यै नमः ...
८ लो ॐ ह्रीं श्रीं ह्रीं सः नमो भगवती महादुर्गे चं ...
कात्यायनि नमः इति ... ॐ नमः विच्चि ...
किलि किलि त्रिशूल ... हि ...
आगच्छ बलिं पूजा गृह्ण गृह्ण सर्वसिद्धिं कुरु कुरु स्वाहा
ॐ ह्रीं श्रीं विंध्यवासिन्यै नमः ॐ ह्रीं श्रीं रक्तदंतिकायै नमः
ॐ शताक्ष्यै नमः ॐ शाकंभर्यै नमः ॐ भीमायै नमः ॐ
ह्रीं श्रीं भ्रामर्यै नमः ॐ ह्रीं श्रीं चामुंडायै पाद्यं अर्घं आचमनी
यं स्नानीयं गंधपुष्पाक्षतधूपदीपनैवेद्याचमनीयं ॐ ह्रीं श्रीं
चंडके चामुंडे गणपति पति क्षेत्रपालाय नमः ९ पू कसी

...

१ दुर्गा ॐ सि ग णे न श्रीमा हे उ च ॐ
ॐ अस्य श्रीदेवीकवचस्तोत्रमंत्रस्य ब्रह्मा ऋषिरनु
ष्टुप्छंदः महाकालीमहालक्ष्मीमहासरस्वती देवता
ऐं बीजं ह्रीं शक्तिः क्लीं कीलकं महामायाप्रीत्यर्थे ज
पे पाठे विनियोगः अथ ध्या ॐ सद्यो संस्थापन्ना
यत्र प हरणविधौ मोहिनैर्नुग्रहेपि सर्वेषांमंग
लानां निजमहिमवशादक्रमेणैव पालं नित्यं की
डाप्रसक्ता रचयति सकलं स्वात्मशक्त्या प्रपंचं सान
प्रसादाय भूयादभिमतफलदा भद्रकाली च काली
१ ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणां यन्न क
स्यचिदाख्यातं तन्मे ब्रूहि पितामह १ श्री ब्रो
च अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं देव्या
स्तु कवचं पुण्यं तच्छृणुष्व महामुने २ प्रथमं

शैलपुत्रीच द्वितीयं ब्रह्मचारिणी तृतीयं चंद्रघं
टेति कूष्मांडेति चतुर्थकं २ पंचमंस्कंदमातेति
षष्ठं कात्यायनीतिच सप्तमंकालरात्रिश्च महा
गौरीतिचाष्टमं ४ नवमंसिद्धिदात्रीच नवदुर्गा
प्रकीर्त्तिताः उक्तान्येतानिनामानि ब्रह्मणैव म
हात्मना ५ अग्निनादह्यमानस्तु शत्रुमध्येग
तोरणे विषमेदुर्गमेचैव भयार्त्ताःशरणंगताः
६ नतेषांजायतेकिंचिदशुभंरणसंकटे नापदं
तस्य पश्यंति शोकदुःखभयंकरी ७ येस्तु भक्त्या
स्मृतानूनं तेषांसिद्धिप्रजायते प्रेतसंस्थातुचामुं
डावाराही महिषासना ८ ऐंद्रीगजसमारूढा वैं
ष्णवीगरुडासना माहेश्वरीवृषारूढा कौमारी शि

दे दुर्गा. शिखिवाहना ब्राह्मी हंससमारूढा सर्वाभरणभूषि
ता लक्ष्मीपद्मासना देवी पद्महस्ता हरिप्रिया ९
श्वेतरूपधरा देवी ईश्वरी वृषवाहना नानाभ
रणशोभाढ्या नानारत्नोपशोभिता ११ दृश्यंते र
थमारूढा देव्याः क्रोधसमाकुला शंखं चक्रं गदां
शक्तिं हलं च मुशलायुधं १२ खेटकं तोमरं चै
व परशुं पाशमेव च कुंतायुधं त्रिशूलं च शार्ङ्ग
मायुधमुत्तमं १३ दैत्यानां देहनाशाय भक्ता
नामभयाय च धारयंत्यायुधानीत्थं देवानां
च हिताय वै १४ नमस्तेस्तु महारौद्रे महाभय
विनाशिनि त्राहि मां देवि दुष्प्रेक्षे शत्रुणां भयवर्द्धि
नि १५ प्राच्यां रक्षतु मामैंद्री अग्नियामग्निदेवता

दक्षिणेरक्षवाराहि नैऋत्यांखड्गधारणी प्रतीच्यां
वारुणीरक्षेद्वायव्यांमृगवाहनी उदीच्यांरक्षत्कौ
मारीईशान्यांशूलधारणी १७ उर्ध्वंब्रह्माणिमे
रक्षेदधस्ताद्वैष्णवीतथा एवंदशदिशोरक्षेच्चामुं
डाशववाहना १८ जयामेचाग्रतःस्यात्तुविजया
पातुपृष्ठितः अजितावामपार्श्वेतुदक्षिणेचाप
राजिता १९ शिखामेद्योतिनीरक्षेदुमामूर्ध्निव्य
वस्थितः मालाधरीललाटेचभ्रुवौरक्षेद्यशस्वि
नी २० त्रिनेत्राचभ्रुवोर्मध्येयमघंटाचनासिके
शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वारवासिनी २१
कपोलौकालिकारक्षेत्कर्णमूलेतुशांकरी ना
सिकायांसुगंधाच उत्तरोष्ठेतुचर्चिका २२

अधरेचामृतकलाजिह्वायांचसरस्वती दंतान्र
क्षतुकौमारीकंठदेशेतुचंडिका २२ घंटिकांचित्र
घंटेतिमहामायाचतालुके कामाख्याचिबुकंर
क्षेद्वाचंमेसर्वमंगला ग्रीवायांभद्रकालीचपृ
ष्ठवंशेधनुर्द्धरी नीलग्रीवावहिःकंठेनलि
कांनलकूबरी २५ खड्गधारिण्युभौस्कंधौवाहू
मेवज्रधारिणी हस्तयोर्दंडनीरक्षेदंबिकाचां
गुलीषुच २६ नखान्शूलेश्वरीरक्षेत्कुक्षौरक्षे
त्कुलेश्वरी स्तनौरक्षेन्महादेवी मनःशोकवि
नाशिनी २७ हृदयेललितादेवीउदरेशूलधा
रिणी नाभिंचयोगिनीरक्षेद्गुह्यंगुह्येश्वरीतथा
२८ पूतनाकामिकारक्षेद्गुदेमहिषवाहिनी

कक्षां भगवती रक्षेज्जानुनी विंध्यवासिनी २९
जंघे महाबला प्रोक्ता जानुमध्ये विनायकी गु
ल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ३० पा
दांगुली श्रीधरी रक्षेत्पादाधस्थलवासिनी दं
ष्ट्रा करालिनी रक्षेत्केशांश्चैवोर्ध्वकेशिनी ३१ रो
मकूपे षु कौमारी त्वचं वागीश्वरी तथा रक्तमज्जा
वसामांसान्यस्थिमेदांसि पार्वती ३२ अंत्राणि का
लरात्री च पित्तं च मुकुटेश्वरी पद्मावती पद्मको
शे कफे चूडामणिस्तथा ३३ ज्वालामुखी नखाज्वा
लमभेद्या सर्वसंधिषु शुक्रं ब्रह्माणि मे रक्षेच्छा
यां छत्रेश्वरी तथा ३४ अहंकारं मनो बुद्धिं रक्ष
मे धर्मधारिणी प्राणापानौ तथा व्यानमुदानं च

भ दु॰ समानकं ३५ वज्रहस्ता च मे रक्षेत्प्राणान्कल्याणशो
भना रसे रूपे च गंधे च शब्दे स्पर्शे च योगिनी ३६
सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा आयु
र्मे रक्षतु वाराही धर्मं रक्षतु वैष्णवी ३७ यशः की
र्तिं च लक्ष्मीं च सदा रक्षंतु मातरः गोत्रमिंद्राणि
मे रक्षेत्पशून्मे रक्ष चंडिके ३८ पुत्रान्रक्षेन्म
हालक्ष्मीर्भार्यां रक्षतु भैरवी धनेश्वरी धनं
रक्षेत्कौमारी कन्यकां तथा ३९ पंथानं सुपथा
रक्षेन्मार्गं क्षेमकरी तथा राजद्वारे महालक्ष्मीः
विजया सर्वतः स्थिता ४० रक्षाहीनं यतः स्थानं
वर्जितं कवचेन तु तत्सर्वं रक्ष मे देवी जयंती पा
पनाशिनी ४१ रक्ष मे सर्वगात्राणि दुर्गे दुर्गा

पञ्चाशिरोर्शि पदमेकं न गच्छेत्तु यदिच्छेच्छुभमात्मनः
८२ कवचेनावृतो नित्यं यत्र यत्रैव गच्छति तत्र
तत्रार्थलाभश्च विजयः सर्वकामिका ८३ यं यं
चिंतयते कामं तं तं प्राप्नोति निश्चितं परमैश्वर्य
मतुलं प्राप्नोति विपुलं पुमान् ८४ निर्भयो जाय
ते मर्त्यः संग्रामेष्वपराजितः त्रैलोक्ये च भवेत्पू
ज्यः कवचेनावृतः पुमान् ८५ इदं तु देव्याः कव
चं देवानामपि दुर्लभं यः पठेत्प्रयतो नित्यं त्रिसं
ध्यं श्रद्धयान्वितः ८६ देवी कला भवेत्तस्य त्रैलो
क्ये चापराजितः जीवेद्वर्षशतं साग्रमपमृ
त्युविवर्जितः ८७ नश्यन्ति व्याधयः सर्वे लूता
विस्फोटकादयः स्थावरं जंगमं चापि कृत्रिमं

६ दुर्गा॰ चापियद्विधं अभिचाराणिसर्वाणि मंत्रयंत्राणि भू
तले भूचराः खेचराश्चैव कुलजाश्चोपदेशकाः
सहजा कुलजामाला डाकिनी शाकिनीस्तथा अं
तरिक्षचराघोराडाकिन्यश्च महाबलाः ५० ग्र
हभूतपिशाचाश्च यक्षगंधर्वराक्षसाः ब्रह्मरा
क्षसवैतालाः कूष्मांडा भैरवादयः ५१ नश्यंतिदर्श
नात्तस्य कवचे हृदि संस्थिते मानोन्नतिर्भवेद्रा
ज्ञां तेजोवृद्धिकरं परं ५२ यशसा वर्द्धते सोपि
कीर्तिमंडलभूतले जपेत्सप्तशतीं चंडीं कृत्वा
तु कवचं पुरा ५३ यावद्भूमंडले धत्ते सशैलव
नकाननं तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौ
त्रिकी ५४ देहांते परमस्थानं यत्सुरैरपि दुर्लभं

प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ५५ त

स्मात्सर्वं प्रयत्नेन कवचीभवसर्वदा तथाजपस्य

दाभ्याकवचंकामदंमुने ५६ ६ श्री दि २

दि तं वी व सं स्ति ॐ विशुद्धज्ञानदेहाय

त्रिवेदीदिव्यचक्षुषे श्रेयःप्राप्तिनिमित्ताय नमःसो

मार्द्धधारिणे १ सर्वमेतद्विजानीयान्मंत्राणामभि

कीलकं सोपि क्षेममवाप्नोति सततंजाप्यतत्परः

२ सिद्ध्यंतुच्चाटनादीनि वस्तूनि सकलान्यपि एतेन

स्तुवतां देवि स्तोत्रमात्रेण सिद्ध्यति ३ नमंत्रोनौषधं

तत्र न किंचिदपि विद्यते विनाजाप्येन सिद्ध्यंति

सर्वमुच्चाटनादिकं ४ समग्राण्यपि सिद्ध्यंति लो

कशंकामिमां हरः कृत्वा निमंत्रयामास सर्वमे

१ दुर्गा॰ वमिदंशुभं ५ स्तोत्रंवैचंडिकायस्तुतच्चगुप्तंच
कारसः समाप्तिर्यंसमुल्लेनतांयथावन्निमंत्रिणं
६ सोपिक्षेममवाप्नोतिसर्वमेवनसंशयः कृष्णा
यांवाचतुर्दश्यामष्टम्यांवासमाहितः ७ ददाति
प्रतिगृह्णातिनान्यथैषाप्रसिध्यति इत्थंरूपेणकी
लेनमहादेवेनकीलितं ८ योनिःकीलांविधायैनां
नित्यंजपतिसस्फुटं ससिद्धःसगणःसोपिगंधर्वो
जायतेवने ९ नचैवाप्यटतस्तस्यभयंक्वापिन
जायते नापमृत्युवशंयातिमृतोमोक्षमवाप्नु
यात् १० ज्ञात्वाप्रारभ्यकुर्वीतप्रकुर्वाणोविनश्य
ति ततोज्ञात्वैवसंपन्नमिदंप्रारभ्यतेबुधैः ११ सौ
भाग्यादिचयत्किंचिद्दृश्यतेललनाजनैः तत्स

वं त्वत्प्रसादेन तेनाज्ञाप्यमिदं जनैः ११ प्राप्नैस्त्व
ज्ञाप्यमाने स्मिन्लोके संपत्तिरुत्तमकैः भवत्येव स
मग्रापितत्तः प्रारभ्यमेवतत् १२ ऐश्वर्यं त्वत्प्र
सादेन सौभाग्यारोग्यसंपदः शत्रुहानिकरो मो
क्षः स्तूयते साविकैर्जनैः १३ ६ श्री क म
उं ब्रि वा जयंती मंगला काली भद्रकाली
कपालनी दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा न
मोस्तुते १ मधुकैटभ विद्रावि विधात्रि वरदे
नमः रूपं देहि जयं देहि यशो देहि द्विषो जहि
२ महिषासुर निर्नाशि विधात्रि वरदे नमः रूपं
देहि २ रक्तबीजवधे देवि चंडमुंड विनाशिनी
रूपं देहि ४ शुंभस्यैव निशुंभस्य तथा धूम्राक्षस

८ दुर्गा. मर्द्दिनी रूपंदेहि ५ वंदितांघ्रियुगे देवि सौभाग्या
रोग्यदायिनी रूपंदेहि ६ अचिंत्यरूपचरितैः स
र्वशत्रुविनाशिनी रूपंदेहि ७ नतेभ्यः सर्वदाभ
क्त्या चंडिके दुरितापहे रूपन्देहि. ८ स्तुवद्भ्यो भ
क्तिपूर्वं त्वां चंडिके व्याधिनाशिनी रूपंदेहि ९
देहि सौभाग्यमारोग्यं देहि देवि परं सुखं रूपंदे
हि १० विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः
रूपन्देहि ११ विधेहि देवि कल्याणं विधेहि पर
मां श्रियं रूपंदेहि १२ सुरासुरशिरोरत्ननिघृ
ष्टचरणेंबिके रूपन्देहि. १३ विद्यावन्तं यश
स्वंतं लक्ष्मीवंतं जनं कुरु रूपन्देहि. १४ प्रचं
डदैत्यदर्पघ्ने चंडिके प्रणताय मे रूपन्देहि. १५

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरी रूपन्देहि
१५ कृष्णेन संस्तुता देवि सश्वद्भक्त्या सदांबिके रू
पन्देहि। १७ हिमाचलसुतानाथसंस्तुते परमे
श्वरी रूपन्देहि १८ इन्द्राणीपतिसद्भावपूजिते
परमेश्वरी रूपन्देहि १९ देवि प्रचण्डदोर्दण्डदै
त्यदर्पविनाशिनी रूपन्देहि २० देवि भक्तजनोद्दा
मदत्तानन्दोदयेंबिके रूपन्देहि २१ पत्नीं मनोरमां
देहि मनोवृत्तानुसारिणीं तारणीं दुर्गसंसारसा
गरस्य कुलोद्भवां २२ इदं स्तोत्रं पठित्वा तु महास्तो
त्रं पठेन्नरः स तु सप्तशतीसंख्यावरमाप्नोति संप
दः २२ ६ श्री गी स्तो सं ॥ ॐ चंडिकायै
नमः ॐ मूलमंत्रेण प्राणायामं कुर्यात् चन्यासा
देखिना

८ दु०गी०

ॐ अस्य श्रीनवार्णमंत्रस्य ब्रह्माविष्णुमहेश्वरा ऋ
षयः गायत्र्युष्णिगनुष्टुभश्छंदांसि महाकालीम
हालक्ष्मीमहासरस्वती देवता नंदाशाकंभरीभी
माः शक्तयः रक्तदंतिकाभीमाभ्रामर्यो बीजानि अ
ग्निवायुसूर्यास्तत्वानि यथाभीष्टसिद्ध्यर्थे जपे वि
नियोगः ब्रह्माविष्णुमहेश्वरऋषयः शिरसि
गायत्र्युष्णिगनुष्टुप्छंदांसि मुखे महाकालीमहा
लक्ष्मीमहासरस्वतीदेवता हृदि ॐ ऐं अंगुष्ठाभ्यां
नमः ह्रीं तर्जनीभ्यां नमः क्लीं मध्यमाभ्यां नमः
चामुंडायै अनामिकाभ्यां नमः विच्चे कनिष्ठिका
भ्यां नमः ॐ ऐं ह्रीं क्लीं चामुंडायै करतलकर
पृष्ठाभ्यां नमः एव दि दि न्यस्य सं ॐ ऐं न
मः शिखायां ह्रीं ललाटे क्लीं नमो दक्षिणनेत्रे ह्रीं
ध्यां वीजेभ्यो नमः वामस्तने [illegible] अग्निवायु
भ्यो स्तनाविष्टतः हृदि कलंवेदवयो [illegible]

ॐ ह्रांहृदयाय नमः ॐ ह्रीं शिरसे स्वाहा ॐ ह्रूं शिखायै वषट्
ॐ चामुंडायै कवचाय हुं ॐ विच्चे नेत्रत्रयाय वौ
नमो वामनेत्रे चां नमो दक्षिणकर्णे मुं नमो वामकर्णे डा नमो दक्षिणनासिकायां यै नमो वामनासिकायां विं नमो मुखे च्चे नमो गुह्ये एवं न्यासं इति मूलेन मू
र्द्धादिपादान्तमष्टवारं व्यापकं कुर्यात् पादतः पादादि
मूर्द्धान्तमष्टवारं व्यापकं कुर्यात् अथ ध्यानं खड्गं चक्रं
गदां बाणं चापं पाशं च खेटकं भुशुंडं च शिरः खड्गं
दधतीं दशवक्त्रकां १ तामसीं भूषामलां नौमि महाका
लीं दशाम्बिकां काममालां च परशुं मूलं परिघमे
व च २ कुलिशं च धनुश्चक्रं कुंडिकां दंडमेव च
शक्तिं घंटेति जलजं मुशलासीः छुदधीनं २ सुरा
पानं तथा दिव्यं दधतीं लोहितप्रभां पद्मस्थितां म
हालक्ष्मीं भजे महिषमर्द्दिनीं ४ घंटां शूलहले
खड्गमुशलादिधनुस्सरान् दधतीं जलजं नौ

ॐ ह्रीं क्लीं चामुंडायै विच्चे अस्त्राय फट्

९.दुर्गा. मिदेवीगौरीसमुद्भवां ५ ६ ध्या क ॐ ऐं ह्रीं
क्लीं चामुंडायै विच्चे इति मंत्रजपेत्सतमस्तसंवा
ततो विसर्जयेद्देवी इति नवार्णमंत्रविधिः रात्रिस
क्तं पठेदादौ मध्ये सप्तसतीस्तवं प्रान्ते तु जपनीयं
वैदेवीसूक्तमतीक्रमः एवं संपुटितैस्तोत्रं पूर्वोक्त
फलदायिकं १ ॐ रात्रीव्यख्यदायतीपुरुत्रादे
व्यक्षभिः विश्वा अधिश्रियोधित १ ॐ र्वप्राअम
र्त्यानिवतोदेव्युद्वतः ज्योतिषाबाधतेतमः २ नि
रुस्वसारमस्कृतोषसं देव्यायती अपेदुहासतेतमः
३ सानोअद्ययस्यावयं नितेयामं नविश्महि व
क्षेनवसतिं वयः ४ नियामासोअविक्षत निप
द्वंतो निपक्षिणः निश्येनासश्चिदर्थिनः ५ याव

यावत्कं॥वत्कं यवयत्नेन मूर्ध्नि आध्यानः सुतरां भव
६ उपमायेति सत्तमः कर्त्तव्यं क्रमस्थिता ३ उप ऋ
लि वयातव ७ उपतेगाइषाकरं वर्लाख्यं दुरितं दि
वः राधिसोमंन जिग्यषे ८ ६ स स सं लि
वालं स्वाहेति पठित्वा देवीं धर्मं क्रिरं तेतिया त्रिसकं
ॐ ग शा न ॐ अस्य श्री सप्तसतिका स्तोत्र
मालामंत्रस्य श्री मार्कंडेय ऋषिर्गायत्र्याद्याभीः महालक्ष्मी
देवता अनुष्टुब्जगत्यछंदांसि ऐं ह्रीं क्लीं बीजानि श
शक्तिः भुक्तिमुक्तिसिद्ध्यर्थे जपे पाठे विनियोगः
ॐ अस्य श्री प्रथमचरित्रस्य ब्रह्मा ऋषिर्महाका
ली देवता गायत्री छंदः नंदजा शक्तिः रक्तदंतिका
बीजं अग्निस्तत्वं महाकाली प्रीत्यर्थे प्रथम चरित्र

११दुर्गा· प्रजपे विनियोगः ॥ ध्या ॥ ॐ खड्गं चक्रगदेषु
चापपरिघां शूलं भुशुंडीं शिरः शंखं संदधतीं क
रैस्त्रिनयनां सर्वांगभूषावृतां नीलांबुद्युतिना
स्यपाददशकां सेवे महाकालिकां यामस्तौ स्वपिते
हरौ कमलजो हंतुं मधुं कैटभं ॥ ॐ अस्यावाहयेत
महाकालीं सर्वरोगोपहारिणीं पूजार्थी मेदिकल्पा
लि देवदेवैः सुपूजिता ॥ २ ॥ ६ ॥ प्रा ॥ नम ड्रि
का ॥ तपस्यंतं महात्मानं मार्कंडेयं महामुनिं व्या
सशिष्यो महातेजा जैमुनिः परिपृच्छति ॥ २ ॥ श्री
कं ॥ य ॥ वा ॥ ॐ सावर्णिः सूर्यतनयो यो मनुः
कथ्यतेऽष्टमः ॥ निशामय तदुत्पत्तिं विस्तराद्गद
तो मम ॥ २ ॥ महामायानुभावेन यथा मन्वंतराधिपः

सवभूवमहाभागसावर्णिस्तनयोरवेः २ स्वारो
चिषेंतरेपूर्वंचैत्रवंशसमुद्भवः सुरथोनामरा
जाभूत्समस्तेक्षितिमंडले ३ तस्यपालयतःसम्य
क्प्रजाःपुत्रानिवौरसान् बभूवुःशत्रवोभूपाःको
लाविध्वंसिनस्तदा ४ तस्यतैरभवद्युद्धमतिप्रब
लदंडिनः न्यूनैरपिसतैर्युद्धेकोलाविध्वंसिभि
र्जितः ५ ततःस्वपुरमायातोनिजदेशाधिपोभवत्
आक्रांतःसमहाभागस्तैस्तदाप्रबलारिभिः ६ अमा
त्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः कोशोबलंचा
पहृतंतत्रापिस्वपुरेततः ७ ततोमृगयाव्याजेनहृत
स्वाम्यःसभूपतिः एकाकीहयमारुह्यजगामगह
नंवनं ८ सतत्राश्रममद्राक्षीद्द्विजवर्यस्यमेधसः

१२ दु॰श्री॰

प्रशांतस्वापदाकीर्णं मुनिशिष्योपशोभितं ९ त
स्थौ कंचित्स कालंच मुनिना तेन सत्कृतः । इत
स्ततश्च विचरंस्तस्मिन्मुनिवराश्रमे सोऽचिन्तय
त्तदा तत्र ममत्वाकृष्टमानसः । मत्पूर्वैः पालितं पू
र्वं मयाहीनं पुरं हि तत् ११ मद्भृत्यैस्तैरसद्वृत्तैर्ध
र्मतः पाल्यते न वा । न जाने स प्रधानो मे शूरहस्ती
सदामदः १२ मम वैरिवशं यातः कान्भोगानु
पलप्स्यते । ये ममानुगता नित्यं प्रसादधनभोज
नैः १३ अनुवृत्तिं ध्रुवं तेद्य कुर्वंत्यन्यमहीभृतां
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययं १४ सं
चितः सोतिदुःखेन क्षयं कोशो गमिष्यति । एतच्चा
न्यच्च सततं चिंतयामास पार्थिवः १५ तत्र विप्राश्र

माभ्यासेवैश्यमेकंददर्शसः स पृष्टस्तेनकस्त्वंभो
हेतुश्चागमनेत्रकः [१०] ११ सशोकइवकस्मात्वंदुर्मना
इवलक्ष्यते इत्याकर्ण्यवचस्तस्यभूपतेप्रणयोदि [११]
तं [१२] १२ प्रत्युवाचसतंवैश्यःप्रश्रयावनतोनृपं
वै उ [२] च समाधिर्नामवैश्योहमुत्पन्नोधनि
नांकुले [२१] १४ पुत्रदारैर्निरस्तश्चधनलोभादसा
धुभिः विहीनश्चधनैर्दारैःपुत्रैरादायमेधनं
१५ [२२] वनमभ्यागतोदुःखीनिरस्तश्चाप्तबंधुभिःसो
हंनवेद्मिपुत्राणांकुशलाकुशलात्मिकां २ [२३] प्र
वृत्तिंस्वजनानांचदाराणांचात्रसंस्थितः किंनु
तेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं [२४] १७ कथंते [२५]
किंनुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः वा

२२ दुर्गा० यैर्न्निरस्तोभवांल्लुब्धैः पुत्रदारादिभिर्धनैः [२७] तेषुकिं
भवतःस्नेहमनुबध्नातिमानसं [२८] २२ वै उ [२९] च ए
वमेतद्यथाप्राहभवानस्मद्गतंवचः [३०] किंकरोमि
नबध्नातिममनिष्ठुरतांमनः २४ यैःसंत्यज्यपि
तृस्नेहंधनलुब्धैर्न्निराकृतः [३१] पतिःस्वजनहार्द्दं
चहार्द्दितेष्वेवमेमनः २५ किमेतन्नाभिजाना
मिजानन्नपिमहामते [३२] यत्प्रेमप्रवणंचित्तंविगुणे
ष्वपिबंधुषु २६ तेषांकृतेमेनिःश्वासोदौर्मनस्यं
चजायते [३३] करोमिकिंयन्नमनस्तेष्वप्रीतिषुनि
ष्ठुरं २७ [३४] मा उ उ [३५] च ततस्तौसहितौवि
प्र [३६] तंमुनिंसमुपस्थितौ समाधिर्न्नामवैश्योसौ
सचपार्थिवसत्तमः २८ कृत्वातुतौयथान्याय्यं

यथार्हं तेन संविदं उपविष्टौ कथाः काश्चिच्चक्रतु
र्वैश्यपार्थिवौ २९ रा वा भगवंस्त्वामहं प्रष्टुमि
च्छाम्येकं वदस्व तत् दुःखाय यन्मे मनसः स्वचि
त्तायत्ततां विना ३१ ममत्वं गतराज्यस्य राज्यांगेष्व
खिलेष्वपि जानतोपि यथाज्ञस्य किमेतन्मुनिसत्त
म ३२ अयं च निःकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झि
तः स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यपि ३३
एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ दृष्टदोषे
पि विषये ममत्वाकृष्टमानसौ ३४ तत्किमेतन्म
हाभाग यन्मोहो ज्ञानिनोरपि ममास्य च भवत्ये
षा विवेकांधस्य मूढता ३५ ऋ उ ३६ ज्ञान
मस्ति समस्तस्य जंतोर्विषयगोचरे विषयश्च

ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलं यतो हि ज्ञानिनः सर्वे
पशुपक्षिमृगादयः ३०
२५ दुर्गा. महाभाग जातिष्वेव पृथक्पृथक् ३५ दिवांधाः
प्राणिनः केचिद्रात्रावंधास्तथापरे केचिद्दिवा त
था रात्रौ प्राणिनस्तुल्यदृष्टयः ३६ ज्ञानं च तन्म
नुष्याणां यत्तेषां मृगपक्षिणां मनुष्याणां च यत्ते
षां तुल्यमन्यत्तथोभयोः ३८ ज्ञानेपि सति पश्यैता
न्पतंगाञ्छावचंचुषु कणमोक्षादृतान्मोहात्पी
ड्यमानानपि क्षुधा ३९ मानुषा मनुजव्याघ्र सा
भिलाषाः सुतान्प्रति लोभात्प्रत्युपकाराय नन्वे
तान्किं न पश्यति ४० तथापि ममतावर्त्ते मोहग
र्त्ते निपातिताः महामायाप्रभावेन संसारस्थिति
कारिणा ४१ तन्नात्र विस्मयः कार्यो योगनिद्रा
जगत्पतेः महामाया हरेश्चैतत्तया संमोह्यते जगत् ४२

ज्ञानिनामपि चेतांसि देवी भगवती हि सा बलादा
कृष्य मोहाय महामाया प्रयच्छति ४२ तया विसृ
ज्यते विश्वं जगदेतच्चराचरं सैषा प्रसन्ना वरदा
नृणां भवति मुक्तये ४४ सा विद्या परमा मुक्तेर्हे
तुभूता सनातनी संसारबंधहेतुश्च सैव सर्वे
श्वरेश्वरी ४५ रा वा भगवन्का हि सा देवी
महामायेति यां भवान् ब्रवीति कथमुत्पन्ना सा
कर्मास्याश्च किं द्विज ४६ यत्स्वभावा च सा देवी य
त्स्वरूपा यदुद्भवा तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्म
विदां वर ४७ रु रु च नित्यैव सा जगन्मूर्ति
स्तया सर्वमिदं ततं तथापि तत्समुत्पत्तिर्बहुधा
श्रूयतां मम ४८ देवानां कार्यसिद्ध्यर्थमाविर्भवति

२५ दुर्गा॰ सायदा ६५ उत्पन्नेतितदालोके सानित्याप्यभिधीय
ते ॥ योगनिद्रां यदाविष्णुर्जगत्येकार्णवीकृते ६६
आस्तीर्यशेषमभजत्कल्पान्तेभगवान्प्रभुः ॥
तदाद्वावसुरौघोरौविख्यातौमधुकैटभौ ६७ विष्णु
कर्णमलोद्भूतौहन्तुंब्रह्माणमुद्यतौ ॥ सनाभि
कमलेविष्णोःस्थितोब्रह्माप्रजापतिः ६८ दृष्ट्वातावसु
रौचोग्रौप्रसुप्तंचजनार्दनं ॥ तुष्टावयोगनि
द्रांतामेकाग्रहृदयस्थितः ६९ विबोधनार्थायहरेर्ह
रिनेत्रकृतालयां ॥ ७० विश्वेश्वरींजगद्धात्रींस्थि
तिसंहारकारिणीं निद्रांभगवतींविष्णोरतुलांते
जसःप्रभोः ॥ ७१ ब्रै वा ७२ त्वंस्वाहात्वंस्वधात्वंहि
वषट्कारःस्वरात्मिका ७३ सुधात्वमक्षरेनित्येत्रिधा

मात्रानित्यकास्थिता ५५ अर्द्धमात्रास्थितानित्यायाअ
नुच्चार्याविशेषतः त्वमेवसात्वंसावित्रीत्वंदेवीज
ननीपरा ५६ त्वयैतद्धार्यतेविश्वंत्वयैतत्सृज्यते
जगत् त्वयैतत्पाल्यतेदेवित्वमत्स्यंतेचसर्वदा ५७
विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने तथासं
हृतिरूपांतेजगतोस्यजगन्मये ५८ महाविद्याम
हामायामहामेधामहास्मृतिः महामोहाचभव
तीमहादेवीमहासुरी ५९ प्रकृतिस्त्वंचसर्वस्य
गुणत्रयविभावनी कालरात्रिर्महारात्रिर्मोहरा
त्रिश्चदारुणा ६० त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धि
र्बोधलक्षणा लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिःक्षां
तिरेवच ६१ खड्गिनीशूलनीघोरागदिनीचक्रि

२८ दुर्गा. लीतथा शंखिनी चापिनी बाणाः भुसुंडीपरघायुधाः
६२ सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी प
रापराणांपरमा त्वमेवपरमेश्वरी ६३ यच्चकिंचि
त्क्वचिद्वस्तु सदसद्वाखिलात्मिके तस्य सर्वस्य या
शक्तिः सात्वंकिंस्तूयसेतदा ६४ यया त्वया जगत्स्र
ष्टा जगत्पात्यत्ति यो जगत् सोपि निद्रावशं नीतः क
स्त्वांस्तोतुमिहेश्वरः ६५ विष्णुःशरीरग्रहणमह
मीशान एव च कारितास्ते यतोतस्त्वां कः स्तोतुं शक्ति
मान्भवेत ६६ सात्वमित्थं प्रभावैः स्वैरुदारैर्देवि सं
स्तुता मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ६७
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु बोध
श्च क्रियतामस्य हन्तुमेतौ महासुरौ ६८ ऋ रु च २८

एवंस्तुतातदादेवितामसीतत्रवेधसा॥ विष्णोःप्र
बोधनार्थायनिहंतुंमधुकैटभौ॥६९॥नेत्रास्यना
सिकाबाहुहृदयेभ्यस्तथोरसः॥निर्गम्यदर्शनेत
स्थौब्रह्मणोव्यक्तजन्मनः॥७०॥उत्तस्थौचजग
न्नाथस्तयामुक्तोजनार्दनः॥एकार्णवेहिशयना
त्ततःसददृशेचतौ॥७१॥मधुकैटभौदुरात्माना
वतिवीर्यपराक्रमौ॥क्रोधरक्तेक्षणावत्तुंब्रह्माणं
जनितोद्यमौ॥७२॥समुत्थायततस्ताभ्यांयुयुधेभ
गवान्हरिः॥पंचवर्षसहस्राणिबाहुप्रहरणोवि
भुः॥७३॥तावप्यतिबलोन्मत्तौमहामायाविमो
हितौ॥उक्तवन्तौवरोस्मत्तोव्रियतामितिकेशवं
॥७४॥श्रीभगवानुवाच॥भवेतामद्यमेतुष्टौममवध्या

२० दुर्गा०

नुभावपि॥ किमन्येन वरेणात्र यत्तावद्धि वृतं मम ॥७५॥
ऋषिरुवाच॥ वंचिताभ्यामिति तदा सर्वमापोमयं जग
त्॥ विलोकताभ्यां गदितो भगवान्कमलेक्षणः॥७६॥
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता॥७७॥ ऋ
षिरुवाच॥ तथेत्युक्त्वा भगवता शंखचक्रगदाभृता॥
कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः॥७८॥ ए
वमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं॥ प्रभावम
स्या देव्यास्तु भूयः शृणु वदामि ते॥७९॥ इति मार्कंडेय
पुराणे सावर्णिके मन्वंतरे देवीमहात्म्ये मधुकैटभ
वधो प्रथमः ध्यायः॥१॥ ओं अस्य श्री मध्यम चरित्र
स्य विष्णुऋषिः महालक्ष्मीर्देवता उष्णिक्छंदः॥ शा
कंभरी शक्तिः दुर्गा बीजं वायुस्तत्वं यजुर्वेद स्तुतिः

महलक्ष्मीप्रीत्यर्थे जपे विनियोगः अथ ध्यानं ओं
खड्गं चक्रगदेषु चापपरिघां शूलं भुसुंडीं शिरः शं
खं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृतां
नीलाम्बुद्युतिनास्यपाददशकां सेवे महाकालि
कां यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभं
१ ऋषिरुवाच देवासुरमभूद्युद्धं पूर्णमब्द
शतं पुरा महिषे सुराणामधिपे देवानां च पुरंदरे
१ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं जि
त्वा च सकलान्देवानिंद्रोभून्महिषासुरः २ त
तः पराजिता देवाः पद्मयोनिं प्रजापतिं पुरस्कृत्य
गतास्तत्र यत्रेशगरुडध्वजौ ३ यथावृत्तं तयोस्त
द्वन्महिषासुरचेष्टितं त्रिदशाः कथयामासुर्देवा

२८ दुर्गा० भिः भवविस्तरं ४ सूर्येंद्राग्न्यनिलेंदूनां यमस्य वरु
णस्य च अन्येषां चाधिकारान्स स्वयमेवाधिति
ष्ठति ५ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि
विचरंति यथा मर्त्या महिषेण दुरात्मना ६ एतद्वः
कथितं सर्वममरारिविचेष्टितं शरणं वः प्रपन्नास्मा
वधस्तस्य विचिंत्यतां ७ इत्थं निशम्य देवानां वचां
सि मधुसूदनः चकार कोपं शंभुश्च भ्रुकुटीकुटि
लाननौ ८ ततोतिकोपपूर्णस्य चक्रिणो वदनात्ततः
निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ९ अन्ये
षां चैव देवानां शक्रादीनां शरीरतः निर्गतं सुमह
त्तेजस्तच्चैक्यं समगच्छत १० अतीव तेजसः कूटं
ज्वलंतमिव पर्वतं ददृशुस्ते सुरास्तत्र ज्वालाव्या

व्याप्तदिगंतरं ११ अतुलं तत्र तत्तेज सर्वदेवशरी
रजं एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा १२
यदभूच्छांभवं तेजस्तेनाजायत तन्मुखं याम्येन
चाभवन्केशा बाहवो विष्णुतेजसा १३ सौम्येन स्त
नयोर्युग्मं मध्यं चैंद्रेण चाभवत् वारुणेन च जं
घोरू नितंबस्तेजसा भुवः १४ ब्रह्मणस्तेजसा पादौ
तदंगुल्योर्कतेजसा वसूनां च करांगुल्यः कौबेरेण
च नासिका १५ तस्यास्तु दंताः संभूताः प्राजापत्ये
न तेजसा नयनत्रितयं जज्ञे तथा पावकतेजसा
१६ भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च
अन्येषां चैव देवानां संभवस्तेजसां शिवा १७ त
तः समस्तदेवानां तेजोराशिसमुद्भवां तां विलोक्य

१८ दुर्गा. मुदंप्रापुरमरामहिषार्दिताः १८ शूलंशूलाद्वि
निष्कृष्यददौतस्यैपिनाकधृक् चक्रंचदत्तवान्कृ
ष्णःसमुत्पाद्यस्वचक्रतः १९ शंखंचवरुणःशक्तिं
ददौतस्यैहुताशनः मारुतोदत्तवांश्चापंबाणपू
र्णेतथेषुधीः २० वज्रमिंद्रःसमुत्पाद्यःकुलिशा
दमराधिपः ददौतस्यैसहस्राक्षोघंटमैरावता
द्गजात् २१ कालदंडाद्यमोदंडंपाशंचाम्बुपतिर्द
दौ प्रजापतिश्चाक्षमालांददौब्रह्माकमंडलुं २२
समस्तरोमकूपेषुनिजरश्मीन्दिवाकरः काल
श्चदत्तवान्खड्गंतस्याश्चर्मचनिर्मलं २३ क्षीरोद
श्चामलंहारमजरेचतथाम्बरे चूडामणिंतथादि
व्यंकुंडलेकटकानिच २४ अर्द्धचंद्रंतथाशुभ्रंके

यूरान्सर्वबाहुषु नूपुरौ विमलौ तद्वद्ग्रैवेयकम
नुत्तमं २५ [२६] अंगुलीयकरत्नानि समस्तास्वंगुली
षु च विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलं २६ [२७]
अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनं अम्ला
नपंकजां मालां शिरस्युरसि चापरां [२८] २७ अदद
ज्जलधिस्तस्यै पंकजं चातिशोभनं हिमवान्वाह
नं सिंहं रत्नानि विविधानि च [२९] २८ ददावशून्यं सुर
या पानपात्रं धनाधिपः शेषश्च सर्वनागेशो महा
मणिविभूषितं [३०] २९ नागहारं ददौ तस्यै धत्ते यः
पृथिवीमिमां अन्यैरपि सुरैर्देवी भूषणैरायुधै
स्तथा [३१] ३० संमानिता ननादोच्चैः साट्टहासं मुहु
र्मुहुः तस्या नादेन घोरेण कृत्स्नमापूरितं नभः [३२]
३१

२. दुर्गा. अमायतातिमहताप्रतिशब्दोमहानभूत् चुक्षुभुः
सकलालोकाःसमुद्राश्चचकंपिरे ३३ चचालवसु
धाचेलुःसकलाश्चमहीधराः जयेतिदेवाश्चमुदा
तामूचुःसिंहवाहिनीं ३४ तुष्टुवुर्मुनयश्चैनांभ
क्तिनम्रात्ममूर्तयः दृष्ट्वासमस्तंसंक्षुब्धंत्रैलोक्य
ममरारयः ३५ सन्नद्धाखिलसैन्यास्तेसमुत्तस्थुरु
दायुधाः आःकिमेतदितिक्रोधादाभाष्यमहिषासुरः
३६ अभ्यधावततंशब्दमशेषैरसुरैर्वृतः सददर्श
ततोदेवींव्याप्तलोकत्रयांत्विषा ३७ पादाक्रांत्या
नतभुवंकिरीटोल्लिखितांबरां क्षोभिताशेषपा
तालांधनुर्ज्यानिस्वनेनतां ३८ दिशोभुजसहस्रे
णसमंताद्व्याप्यसंस्थितां ततःप्रवृत्तेयुद्धंतया

देव्यासुरद्विषां ३९ ननादासौ वीरुधामुच्चैर्नादि
त दिगंतरं महिषासुरसेनानी श्चिक्षुराख्यो म
हासुरः ४० युयुधे चामरश्चान्यैश्चतुरंगब
लान्वितः रथानामयुतैः षड्भिरुदग्राख्यो महासु
रः ४१ अयुध्यतायुतानां च सहस्रेण महाहनुः
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ४२
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे गजवा
जिसहस्रौघैरनेकैः परिवारितः ४३ वृतो रथा
नां कोट्या च युद्धे तस्मिन्नयुध्यत बिडालाख्यो
महादैत्यः पंचाशद्भिरथायुतैः ४४ युयुधे संयुगे
तत्र रथानां परिवारितः अन्ये च तत्रायुतशो रथ
नागहयैर्वृताः ४५ युयुधुः संयुगे देव्या सह तत्र

महासुराः कोटिकोटिसहस्रैश्चैरथानां दंतिनां तथा
४५ हयानां च वृतो युतो युद्धे तत्राभून्महिषासुरः
तोमरैर्भिंदिपालैश्च शक्तिभिर्मुशलैस्तथा ४६ यु
युधुः संयुगे देव्या खड्गैः परशुपट्टिशैः केचिच्च चि
क्षिपुः शक्तीः केचित्पाशांस्तथापरे ४७ देवीं खड्गप्र
हारैस्तु ते तां हंतुं प्रचक्रमुः सापि देवी ततस्तानि श
स्त्राण्यस्त्राणि चंडिका ४८ लीलयैव प्रचिच्छेद निज
शस्त्रास्त्रवर्षिणी अनायस्तानना देवी स्तूयमाना
सुरर्षिभिः ४९ मुमोचासुरसैन्येषु शस्त्राण्यस्त्राणि
चेश्वरी सोपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ५०
चचारासुरसैन्येषु वनेष्विव हुताशनः निश्वा
सान्मुमुचे यांश्च युध्यमाना रणेंबिका ५१ तएव

सद्यः संभूतागणाःशतसहस्रशः युयुधुस्तेपरशु
भिर्भिंडीपालासिपट्टिसैः ५२ [५३] नाशयंतो सुरगणान्
देवीशक्त्युपबृंहिताः अवादयंतःपटहान्गणाःशं
खांस्तथापरे ५३ [५४] मृदंगांश्चतथैवान्येतस्मिन्युद्ध
महोत्सवे ततोदेवीत्रिशूलेनगदयाशक्तिवृष्टि
भिः ५४ [५५] खड्गादिभिश्चशतशोनिजघानमहासुरा
न् पातयामासचैवान्यान्घंटास्वनविमोहितान्
५५ [५६] असुरान्भुविपाशेनबध्वाचान्यानकर्षत
केचिद्द्विधाकृतास्तीक्ष्णैःखड्गपातैस्तथापरे ५६ [५७]
विपोथितानिपातेनगदयाभुविशेरते वेमुश्चके
चिद्रुधिरंमुशलेनभृशंहताः ५७ [५८] केचिन्निपति
ताभूमौभिन्नाःशूलेनवक्षसि निरंतराःशरौघेण

कृताः केचिद्रणाजिरे ५८ श्येनानुकारिणः प्राणा
न्मुमुचुस्त्रिदशार्द्दनाः केषांचिद्बाहवश्छिन्नाश्छि
न्नग्रीवास्तथापरे ५९ शिरांसि पेतुरन्येषामन्ये म
ध्ये विदारिताः विच्छिन्नजंघास्त्वपरे पेतुरुर्व्यां महा
सुराः ६० एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा
कृताः छिन्नेपि चान्ये शिरसि पतिताः पुनरुत्थिता
६१ कबंधा युयुधुर्द्देव्या गृहीतपरमायुधाः ननृ
तुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ६२ कबंधा
श्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः तिष्ठतिष्ठेति
भाषंतो देवीमन्ये महासुराः ६३ पातितै रथनागाश्वै
रसुरैश्च वसुंधराः अगम्या साभवत्तत्र यत्राभू
त्स महारणः ६४ शोणितौघा महानद्यः सद्यस्तत्र

विमुस्तुवुः मध्ये चासुरसैन्यस्य वारिणासुरवा
जिनां ६५ दालेन तन्महासैन्यमसुराणां तथां
बिका निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयं
६६ स च सिंहो महानादमुत्सृजन्धुतकेसरः
शरीरेभ्योमरारीणामसूनिव विचिन्वति ६७
देव्यागणैश्च तैस्तत्र कृतं युद्धं तथासुरैः यथै
२ षां तुतुषुर्देवाः पुष्पवृष्टिमुचोदिवि ६८ इ मा
र्कं य रा सा र्णि म त दे मा त्म्ये
म षा र धः २ ऋ रु च निहन्यमा
नं तत्सैन्यमवलोक्य महासुरः सेनानीश्चिक्षु
रः कोपाद्ययौ योद्धुमथांबिका ५ स देवीं शरवर्षे
णववर्ष समरेऽसुरः यथा मेरुगिरेः शृंगं तोयवर्षे

२२ दुर्गा. ललौयदा २ ३ तस्य छित्वा ततो देवी लीलयैव शरो
त्करान् जघान तुरगान्बाणैर्यंतारं चैव वाजि
नां ३ ४ चिछेद च धनुस्सद्यो ध्वजं चातिसमुछ्रि
तं विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः
४ सछिन्नधन्वा विरथो हताश्वो हतसारथिः अ
भ्यधावत तां देवीं खड्गचर्मधरोसुरः ५ सिंहमा
हत्य खड्गेन तीक्ष्णधारेण मूर्द्धनि आजघान
भुजे सव्ये देवीमप्यतिवेगवान् ६ तस्याः खड्गो
भुजं प्राप्य पफाल नृपनंदन ततो जग्राह शूलं
स कोपादरुणलोचनः ७ चिक्षेप च ततस्तत्तु
भद्रकाल्यां महासुरः जाज्वल्यमानं तेजोभी
रविबिंबमिवाम्बरात् ८ दृष्ट्वा तदापतच्छूलं

देवीशूलममुंचत तच्छूलंशतधातेननीतंस
चमहासुरः १० हतेतस्मिन्महावीर्ये महिषस्य
चमूपतौ आजगामगजारूढश्चामर स्त्रिदशा
र्दनः ११ सोपिशक्तिंमुमोचाथ देव्यास्तामंबि
काद्रुतं हुंकाराभिहतांभूमौ पातयामासनिः
प्रभां १२ भग्नांशक्तिंनिपतितांदृष्ट्वाकोपस
मन्वितः चिक्षेपचामरःशूलंबाणैस्तदपिसा
छिनत १३ ततःसिंहःसमुत्पत्यगजकुंभांत
रेस्थितः बाहुयुद्धेनयुयुधे तेनोच्चैस्त्रिदशा
रिणा १४ युध्यमानौ ततस्तौतु तस्मान्नागान्म
हींगतौ युयुधातेतिसंरब्धौप्रहारैरतिदारुणैः
१५ ततोवेगात्खमुत्पत्य निपत्यचमृगारिणा

करप्रहारेणशिरश्चामरस्यपृथक्कृतं १५ उ
दग्रश्चरणेदेव्याशिलावृक्षादिभिर्हतः दंतमुष्टि
तलैश्चैवकरालश्चनिपातितः १६ देवीक्रुद्धा
गदापातैश्चूर्णयामासचोद्धतं बाष्कलंभिंदिपा
लेनबाणैस्ताम्रंतथांधकं १७ उग्रास्यमुग्रवी
र्यंचतथैवचमहाहनुं त्रिनेत्राचत्रिशूलेन
जघानपरमेश्वरी १८ बिडालस्यासिनाकाया
त्पातयामासवैशिरः दुर्धरंदुर्मुखंचोभौशरै
र्निन्येयमक्षयं १९ एवंसंक्षीयमानेतुस्वसै
न्येमहिषासुरः माहिषेणस्वरूपेणत्रासयामा
सतान्गणान् २० कांश्चित्तुंडप्रहारेणखुरक्षे
पैस्तथापरान् लांगूलताडितांश्चान्यान् शृंगा

भ्यांच विदारितान् २२ वेगेनकांश्चिदपरान्नादे
नभ्रमणेनच निश्वासपवनेनान्यान्पातयामा
सभूतले २२ निपात्यप्रमथाप्रमथानीकमभ्य
धावतसोसुरः सिंहंहंतुमहादेव्याःकोपंचक्रेत
तोंबिका २३ सोपिकोपान्महावीर्यःखुरक्षुण्ण
महीतलः शृंगाभ्यांपर्वतानुच्चैश्चिक्षेपचनना
दच २४ वेगभ्रमणविक्षुण्णामहीतस्यव्यशीर्य
त २५ लांगूलेनाहतश्चाब्धिः प्लावयामाससर्व
तः २५ धुतशृंगविभिन्नाश्चखंडखंडंययुर्घ
नाः श्वासानिलास्ताःशतशोनिपेतुर्नभसोचलाः
२६ इतिक्रोधसमाध्मातमापतंतंमहासुरं दृष्ट्वा
सा चंडिकाकोपंतद्वधायतदाकरोत् २७ साक्षि

२५ दु॰

क्षात तस्य वै पाशं तं बबंध महासुरं तत्याज मा
हिषं रूपं सोपि बद्धो महामृधे २८ ततः सिंहोभव
त्सद्यो यावत्तस्यांबिका शिरः छिनत्ति तावत्पुरु
षः खड्गपाणिरदृश्यत २९ तत एवाशु पुरुषं
देवी चिच्छेद सायकैः तं खड्गचर्मणा सार्द्धं ततः
सोभून्महागजः ३० करेण च महासिंहं तं चक
र्ष जगर्ज च कर्षतस्तु करं देवी खड्गेन निरकृंत
त ३१ ततो महासुरो भूयो माहिषं वपुरास्थितः तथै
व क्षोभयामास त्रैलोक्यं सचराचरं ३२ ततः क्रु
द्धा जगन्माता चंडिका पानमुत्तमं पपौ पुनः पु
नश्चैव जहासारुणलोचना ३३ ननर्द चासु
रः सोपि बलवीर्यमदोद्धतः विषाणाभ्यां च वि

क्षेप चंडिकाप्रति महीधरान् ३५ साचतान्प्रहितां
स्तेन चूर्णयंती शरोत्करैः उवाचतंमदोद्धूतमु
खरागाकुलाक्षरं ३६ देवा गर्जगर्जक्षणं
मूढ मधुयावत्पिबाम्यहं मयात्वयिहतेत्रैवग
र्जिष्यंत्याशु देवताः ३७ ऋ रु वा एवमुक्त्वा
समुत्पत्य सारूढातंमहासुरं पादेनाक्रम्यकंठेच
शूलेनैनमताडयत् ३८ ततःसोपि पदाक्रांतस्त
या निजमुखात्ततः अर्द्धनिःक्रांतएवासौ युद्ध्यमा
नोमहासुरः ३९ तयामहासिनादेव्याशिरश्छि
त्वानिपातितः ततोहाहाकृतंसर्वंदैत्यसैन्यंनना
शतत् ४० प्रहर्षंचपरंजग्मुःसकलादेवतागणाः
तुष्टुवुस्तांसुरादेवीसहदिव्यैर्महर्षिभिः ४१ जगु

२८ दुर्गा॰ ँधर्वपतयो ननृतुश्चाप्सरोगणाः ४१ इ मा
ऽ पु णे व के न्वं रे वी त्म्ये महिषासुरव
धः ३ ऋ षि रु वा च १ शक्रादयः सुरगणा निह
तेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्ष
पुलकोद्गमचारुदेहाः १ देव्या यया ततमिदं ज
गदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमू
र्त्या तामंबिकामखिलदेवमहर्षिपूज्यां भक्त्या
नताः स्म विदधातु शुभानि सा नः २ यस्याः प्रभा
वमतुलं भगवाननंतो ब्रह्मा हरश्च न हि वक्तु
मलं बलं च सा चंडिकाखिलजगत्परिपाल ना
य नाशाय चाशुभभयस्य मतिं करोतु ३ या श्रीः

स्वयंसुकृतिनांभुवनेष्वलक्ष्मीः पापात्मनांकृतधि
यां हृदयेषु बुद्धिः श्रद्धासतांकुलजनप्रभवस्यल
ज्जा तांत्वांनताःस्मपरिपालयदेवि विश्वं ५ किंव
र्णयामतवरूपमचिंत्यमेतत किंचातिवीर्यमसुर
क्षयकारिभूरि किंचाहवेषुचरितानितवाद्भुतानि
सर्वेषुदेव्यसुरदेवगणादिकेषु ६ हेतुःसमस्तजग
तांत्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा
सर्वाश्रयाखिलमिदंजगदंशभूतमव्याकृताहिप
रमाप्रकृतिस्त्वमाद्या ७ यस्याःसमस्तसुरतासमु
दीरणेन तृप्तिंप्रयातिसकलेषुमखेषुदेवि स्वा
हासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमत
एवजनैःस्वधाच ८ यामुक्तिहेतुरविचिंत्यमहा

 व्रतात्वमभ्यस्यसेसुनियतेंद्रियतत्वसारैः मोक्षार्थि
भिर्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवती
परमाहिदेवि ८ शब्दात्मिकासुविमलर्ग्यजुषां
 निधानमुद्गीथरम्यपदपाठवतांचसाम्नां देवी
त्रयीभगवतीभवभावनायवार्ताचसर्वजगतांपर
मार्त्तिहंत्री ९ मेधासिदेविविदिताखिलशास्त्रसा
रा दुर्गासिदुर्गभवसागरनौरसंगा श्रीःकैटभारिहृ
दयैककृताधिवासा गौरीत्वमेवशशिमौलिकृतप्रति
ष्ठा १०॥ ईषत्सहासममलंपरिपूर्णचंद्रबिंबानुकारि
कनकोत्तमकांतिकांतं अत्यद्भुतंप्रहृतमात्तरुषात
थापि वक्त्रंविलोक्यसहसामहिषासुरेण ११ दृष्ट्वा
तुदेविकुपितंभ्रुकुटीकरालमुद्यच्छशांकसदृश

द्यवियन्नसद्यः प्राणान्मुमोचमहिषस्तदतीवचित्रं
कैर्जीव्यतेहिकुपितांतकदर्शनेन १२ देविप्रसीदप
रमाभवतीभवाय सद्योविनाशयतिकोपवतीकुला
नि विज्ञातमेतदधुनैवयदस्तमेतन्नीतंबलंसुवि
पुलंमहिषासुरस्य १३ तेसंमताजनपदेषुधनानि
तेषांतेषांयशांसिनचसीदतिधर्मवर्गः धन्यास्तए
वनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवती
प्रसन्ना १४ धर्म्याणिदेविसकलानिसदैवकर्माण्य
त्यादृतःप्रतिदिनंसुकृतीकरोति स्वर्गंप्रयातिचततो
भवतीप्रसादाल्लोकत्रयेपिफलदाननुदेवितेन १५
दुर्गेस्मृताहरसिभीतिमशेषजंतोः स्वस्थैःस्मृता
मतिमतीवशुभांददासि दारिद्र्यदुःखभयहारिणि

२८ दुर्गा॰ कात्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता १६ ए
भिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नाम नरका
य चिराय पापं संग्राममृत्युमधिगम्य दिवं प्रयां
तु मत्वेति नूनमहितान्विनिहंसि देवि १७ दृ
ष्ट्वैव किन्नु भवती प्रकरोति भस्म सर्वासुरानरिषु
यत्प्रहिणोषि शस्त्रं लोकान्प्रयांतु रिपवोपि हि श
स्त्रपूता इत्थंमतिर्भवति तेष्वहितेष्व साध्वी १८ ख
ड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकांति
निवहेन दृशोसुराणां यन्नागता विलयमंशुम
दिंदुखंडयोग्याननं तव विलोकयतां तदेतत् १९
दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदवि
चिंत्यमतुल्यमन्यैः वीर्यं च हंतृ हृतदेवपराक्रे

माणां वैरिष्वपिप्रकटितैव दयात्वयेत्थं २० केनोपमा
भवतुतेस्यपराक्रमस्य रूपंचशत्रुभयकार्यतिहारि
कुत्र चित्तेकृपासमरनिष्ठुरताचदृष्टा त्वय्येवदेवि
वरदेभुवनत्रयेपि २२ त्रैलोक्यमेतदखिलंरिपु
नाशनेनत्रातंत्वयासमरमूर्द्धनितेपिहत्वा नीता
दिवंरिपुगणाभयमप्यपास्तमस्माकमुन्मदसुरा
रिभवन्नमस्ते २२ शूलेनपाहिनोदेविपाहिखड्गे
नचांबिके घंटास्वनेननःपाहिचापज्यानिःस्वने
नच २२ प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे
भ्रामणेनात्मशूलस्यउत्तरस्यांतथेश्वरि २४ सौ
म्यानियानिरूपाणित्रैलोक्येविचरंतिते यानिचा
त्यंतघोराणितैरक्षास्मांस्तथाभुवं २५ खड्गशू

दगम्यहन्मतिप्रीत्यास्तवैरेभिस्सुपूजिता। २२

२८ दुर्गा. लगदादीनियानिचास्त्राणिदैवेविकेकरपल्लवसंगी
निनैरस्मान्रक्षसर्वतः २६ ऋषिरुवाच एवंस्तु
तासुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः अर्चिताजग
तांधात्रीतथागंधानुलेपनैः २७ भक्त्यासम
स्तैस्त्रिदशैर्दिव्यैर्धूपैस्तुधूपिता प्राहप्रसादसु
मुखीसमस्तान्प्रणतान्सुरान् २८ देव्युवाच
व्रियतांत्रिदशाःसर्वेयदस्मत्तोभिवांछितं देवा
ऊचुः भगवत्याकृतंसर्वंनकिंचिदवशिष्य
ते ३२ यदयंनिहतःशत्रुरस्माकंमहिषा
सुरः ३४ यदिचापिवरोदेयस्त्वयास्माकंम
हेश्वरि ३५ संस्मृतासंस्मृतात्वंनोहिंसे

थाःपरमापदः ३५ यश्चमर्त्यःस्तवैरेभिस्त्वांस्तोष्य
त्यमलानने ३६ तस्यवित्तर्द्धिविभवैर्द्धनदारादि
संपदां ३७ वृद्धयेस्मत्प्रसन्नात्वंभवेथाःसर्वदांबिके
३७ ऋषिरुवाच ३८ इतिप्रसादितादेवैर्जगतोर्थेतथा
त्मनः तथेत्युक्त्वाभद्रकालीबभूवांतर्हितानृप ३९
३९ इत्येतत्कथितंभूपसंभूतासायथापुरा देवीदेव
शरीरेभ्योजगत्त्रयहितैषिणी ४० पुनश्चगौरीदे
हात्सासमुद्भूतायथाभवत् वधायदुष्टदैत्यानांत
थाशुंभनिशुंभयोः ४१ रक्षणायचलोकानांदे
वानामुपकारिणी तच्छृणुष्वमयाख्यातंयथाव
त्कथयामिते ४२ मा डे पु णे व के
म त द मा त्म्ये शक्रादिस्तुतिर्नाम ४

३ दुर्गा॰ ॐ अस्यश्रीउत्तमचरित्रस्यरुद्रऋषिःमहासरस्व
तीदेवताअनुष्टुप्छंदः भीमाशक्तिःभ्रामरीबीजं
सूर्यस्तत्वंसामवेदमूर्त्तिः महासरस्वतीप्रीत्यर्थे
जपेविनियोगः ॐघंटाशूलहलानिशंखमुश
लेचक्रंधनुःसायकंहस्ताब्जैर्दधतींघनांतविल
सच्छीतांशुतुल्यप्रभां गौरीदेहसमुद्भवांत्रिज
गतामाधारभूतांमहापूर्वीमंत्रसरस्वतीमनुभ
जेशुंभादिदैत्यार्दिनीं १ ध्या ॐ आवाहयेत्त
तांदेवींमहापूर्वसरस्वतीं पूजार्थमेहिकल्याणि
सर्वदुःखविमोचिनी १ ६ वा नं ऋ रु च १
पुराशुंभनिशुंभाभ्यामसुराभ्यांशचीपतेः त्रैलो
क्यंयज्ञभागाश्च हृतामदबलाश्रयात् २ तावेव

सूर्यतांतद्वदधिकारंतथैंदवं कौवेरमथयाम्यंचच
क्रातेवरुणस्यच २ तावेवपवनर्द्धिंच चक्रतुर्वह्नि
कर्मच ततोदेवाविनिर्धूताभ्रष्टराज्यापराजिताः
३ हृताधिकारास्त्रिदशास्ताभ्यांसर्वेनिराकृताः म
हासुराभ्यांतांदेवींसंस्मरंत्यपराजितां ४ तयास्मा
कंवरोदत्तोयथापत्सुस्मृताखिलाः भवतांनाशयि
ष्यामितत्क्षणात्परमापदः ५ इतिकृत्वामतिंदेवाहि
मवंतंनगेश्वरं जग्मुस्तत्रततोदेवीविष्णुमायांप्र
तुष्टुवुः ६ दे उ नमोदेव्यैमहादेव्यैशिवा
यैसततंनमः नमःप्रकृत्यैभद्रायैनियताःप्रणताः
स्मतां ७ रौद्रायैनमोनित्यायैगौर्यैधात्र्यैनमोन
मः ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः ८ १०

१९ दुर्गा कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः नैरृत्यै
भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ९ दुर्गायै दुर्ग
पारायै सारायै सर्वकारिण्यै ख्यात्यै तथैव कृष्णा
यै धूम्रायै सततं नमः १० अतिसौम्यातिरौद्रायै
नतास्तस्यै नमो नमः नमो जगत्प्रतिष्ठायै देव्यै
कृत्यै नमो नमः ११ या देवी सर्वभूतेषु विष्णुमा
येति शब्दिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो १९
नमः १२ या देवी सर्वभूतेषु चेतनेत्यभिधीयते
नमस्तस्यै० १३ या देवी सर्वभूतेषु बुद्धिरूपेण सं
स्थिता नमस्तस्यै १४ या देवी सर्वभूतेषु क्षुधा
रूपेण संस्थिता नमस्तस्यै १५ या देवी सर्वभूतेषु
निद्रारूपेण संस्थिता नमस्तस्यै १६ या देवी सर्व

भूतेषुछायारूपेणसंस्थिता नमस्तस्यै० १७ यादेवी
सर्वभूतेषुशक्तिरूपेणसंस्थिता नमस्तस्यै० १८ या
देवीसर्वभूतेषुतृष्णारूपेणसंस्थिता नमस्तस्यै० १९
यादेवीसर्वभूतेषुक्षांतिरूपेणसंस्थिता नमस्तस्यै०
२० यादेवीसर्वभूतेषुजातिरूपेणसंस्थिता नम
स्तस्यै० २१ यादेवीसर्वभूतेषुलज्जारूपेणसंस्थि
ता नमस्तस्यै० २२ यादेवीसर्वभूतेषुश्रद्धारूपेण
संस्थिता नमस्तस्यै० २३ यादेवीसर्वभूतेषुशांति
रूपेणसंस्थिता नमस्तस्यै० २४ यादेवीसर्वभूते
षुकांतिरूपेणसंस्थिता नमस्तस्यै० २५ यादेवीस
र्वभूतेषुलक्ष्मीरूपेणसंस्थिता नमस्तस्यै० २६
यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थिता नमस्तस्यै २७

१२ दुर्गा० यादेवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता नमस्तस्यै
२० यादेवीसर्वभूतेषुदयारूपेणसंस्थिता नमस्त
स्यै. २१ यादेवीसर्वभूतेषुतुष्टिरूपेणसंस्थिता
नमस्तस्यै. २२ यादेवीसर्वभूतेषुमातृरूपेणसं
स्थिता नमस्तस्यै. २३ यादेवीसर्वभूतेषुभ्रांतिरूपे
णसंस्थिता नमस्तस्यै. २४ इंद्रियाणामधिष्ठात्री
भूतानांचाखिलेषुया भूतेषुसततंतस्यैव्याप्तिदे
व्यैनमोनमः २५ चितिरूपेणयाकृत्स्नमेतद्व्या
प्यस्थिताजगत नमस्तस्यैनमस्तस्यैनमस्तस्यै
नमोनमः २६ स्तुतासुरैःपूर्वमभीष्टसंश्रयात्त
थासुरेंद्रेणदिनेषुसेविता करोतुसानःशुभहे
तुरीश्वरीशुभानिभद्राण्यभिहंतुचापदः २७

मि

यासांप्रतंचोद्धतदैत्यतापितैरस्माभिरीशाच सुरै
र्नमस्यते याच [illegible] तत्क्षणमेव हंतिनः सर्वापदो
भक्तिविनम्रमूर्त्तिभिः ८२ ऋषिरुवाच एवंस्त वादि
[illegible] युक्तानांदेवानांतत्रपार्वती स्नातुमभ्या
ययौतोयेजाह्नव्यानृपनंदन ८३ साब्रवीत्तान्सु
रान्सुभ्रूर्भवद्भिःस्तूयतेत्रका शरीरकोशतश्चा
स्याःसमुद्भूताब्रवीच्छिवा ८४ स्तोत्रंममैतत्क्रिय
तेशुंभदैत्यनिराकृतैः देवैःसमस्तैःसमरेनिशुं
भेनपराजितैः ८५ शरीरकोशाद्यत्तस्याःपार्वत्या
निःसृतांबिका कौशिकीतिसमस्तेषुततोलोकेषु
गीयते ८६ तस्यांविनिर्गतायांतुकृष्णाभूत्सापिपा
र्वती कालिकेतिसमाख्याताहिमाचलकृताश्रया ८७

३३ दुर्गा० ततो विकापरं रूपं बिभ्राणाम्सुमनोहरं ददर्श चंडो मुं
ड श्च भृत्यौ शुंभनिशुंभयोः ४२ ताभ्यां शुंभाय चा
ख्याता अतीव सुमनोहरा काप्यास्ते स्त्री महाराज
भासयंती हिमाचलं ४३ नैव तादृक्क्वचिद्रूपं दृ
ष्टं केनचिदुत्तमं ज्ञायतां काप्यसौ देवी गृह्यतां चा
सुरेश्वर ४४ स्त्रीरत्नमतीचार्वंगी द्योतयंती दिशा
स्त्विषा सा तु तिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्हति ४५
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो त्रैलो
क्ये तु समस्तानि सांप्रतं भांति ते गृहे ४६ ऐरावतः
समानीतो गजरत्नं पुरंदरात् पारिजाततरुश्चायं
तथैवोच्चैःश्रवा हयः ४७ विमानं हंससंयुक्तमेत
त्तिष्ठति तेंऽगणे रत्नभूतमिहानीतं यदासीद्वेध

सोप्युत्ते [९५] ४८ निधिरेषामहापद्मःसमानीतोधनेश्व
रात् किंजल्किनींददौचाब्धिर्मालामम्लानपंक
जां [९६] ४९ छत्रंतेवारुणंगेहेकांचनस्राविति[९७]ष्ठति त
थायंस्यंदनवरोयःपुरासीत्प्रजापतेः [९८] ५० मृत्योरु
त्क्रांतिदानामशक्तिरीशत्वयाहृता पाशःसलिल ता५
राजस्यभ्रातुस्तवपरिग्रहे [९९] ५१ निशुंभस्याब्धि
जाताश्चसमस्तारत्नजातयः वह्निरपिददौतुभ्य
मग्निशौचेचवाससी [९९] ५२ एवंदैत्येंद्ररत्नानिसम
स्तान्याहृतानिते स्त्रीरत्नमेषाकल्याणीत्वयाक
स्मान्नगृह्यते [१००] ५३ ऋ रु च [१] निशम्येतिवचःशुं
भःसतदाचंडमुंडयोः प्रेषयामाससुग्रीवंदूतंदे
व्यामहासुरः [२] ५४ इतिचेतिचवक्तव्यासागत्वात

चकान्मम यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया ल
घु ५५ ऋ उ चे स तत्र गत्वा यत्रास्ते शैलोद्दे
तिशोभने स देवीं तां ततः प्राह श्लक्ष्णं मधुरया गिरा
५६ दू उ चे देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमे
श्वरः दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ५७
अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु निर्जिता
खिलदैत्यारिः स यदाह शृणुष्व तत् ५८ मम त्रैलो
क्यमखिलं मम देवा वशानुगाः यज्ञभागानहं स
र्वानुपाश्नामि पृथक्पृथक् ५९ त्रैलोक्ये वररत्नानि
मम वश्यान्यशेषतः तथैव गजरत्नं च हृत्वा देवें
द्रवाहनं ६० क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः
श्री उच्चैःश्रवसंज्ञं तत्प्रणिपत्य समर्पितं ६१ यानि

वान्यानि देवेषु गंधर्वेषूरगेषु च [१२] रत्नभूतानि
भूतानि तानि मय्येव शोभने ६२ स्त्रीरत्नभूतां त्वां
देवि लोके मन्यामहे वयं सा त्वमस्मानुपागच्छ य
तो रत्नभुजो वयं ६३ [१३] मां वा ममानुजं वापि निशुं
भमुरुविक्रमं भज त्वं चंचलापांगी रत्नभूतासि
वै यतः [१४] ६४ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्र
हात् एतद्बुध्या समालोक्य मत्परिग्रहतां व्रज ६५ [१५]
ऋ रु व [१६] इत्युक्ता सा तदा देवी गंभीरांतःस्मिता
जगौ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ६६ [१७]
दे वा [१८] सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयो
दितं त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि ताद
शः ६७ [१९] किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथं

५प दुर्गा॰ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृता पुरा ६९ [20] योमांज
यतिसंग्रामेयोमेदर्पंव्यपोहति योमेप्रतिबलोलोके
समेभर्त्ताभविष्यति [21] ७० तदागच्छतुशुंभोत्रनिशुं
भोवामहासुरः मांजित्वाकिंचिरेणात्रपाणिंगृह्णा
तुमेलघुः ७१ [22] दू वा [23] अवलिप्तासिमैवंत्वंदेवि
ब्रूहिममाग्रतः त्रैलोक्येकःपुमांस्तिष्ठेदग्रेशुंभ
निशुंभयोः ७२ [24] अन्येषामपिदैत्यानांसर्वेदेवा
नवैयुधि तिष्ठंतिसन्मुखेदेविकिंपुनःस्त्रीत्व
मेकिका ७२ [25] इंद्राद्याःसकलादेवास्तस्थुर्येषांन
संयुगे शुंभादीनांकथंतेषांस्त्रीप्रयास्यसिसन्मुखं
[26] ७३ सात्वंगच्छमयैवोक्तापार्श्वंशुंभनिशुंभयोः
केशाकर्षणनिर्धूतगौरवामागमिष्यसि ७४ [27]

दे वा २८ एवमेतद्बलीशुंभ निशुंभश्चातिवीर्यवा
न् किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ७५ २९
स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः तदाचक्ष्वा
सुरेंद्राय स च युक्तं करोतु यत् ७६ ३० इ मा र्के पु
रा सा र्णि म न दे मा त्म्ये वा न वा
दः ५ ऋ रू च । इत्याकर्ण्य वचो देव्याः स
दूतोमर्षपूरितः समाचष्ट समागम्य दैत्यराजाय
विस्तरात् १ २ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुररा
ट् ततः सक्रोधः प्राह दैत्यानामधिपं धूम्रलोच
नं २ ३ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः
तामानय बलाद्दुष्टां केशाकर्षणविह्वलां ३ ४
तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठते परः स दं

२६ दु॰ मी॰ तव्योमरोवापियक्षोगंधर्वएववा ५ ऋ रु च १
तेनाज्ञप्तस्ततः शीघ्रंसदैत्योधूम्रलोचनः वृतः
षष्ठ्यासहस्राणामसुराणांद्रुतंययौ ५ सदृष्ट्वातां
ततोदेवींतुहिनाचलसंस्थितां जगादोच्चैःप्रयाही
तिमूलंशुंभनिशुंभयोः ६ नचेत्प्रीत्याद्यभवतीम
द्भर्तारमुपैष्यति ततोबलान्नयाम्येषकेशाकर्षण
विह्वलां ७ दे वा १ दैत्येश्वरेणप्रहितोबलवान्
बलसंवृतः बलान्नयसिमामेवंततःकिंतेकरो
म्यहं ८ ऋ रु च १ इत्युक्तःसोभ्यधावत्तामसुरो
शुभम् धूम्रलोचनः हुंकारेणैवतंभस्मसाचकाराम्बि
कातततः ९ अथक्रुद्धंमहासैन्यमसुराणांतथां
बिका ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः १०

ततोधुतसटः कोपात्कृत्वानादंसुभैरवं पपात
सुरसेनायांसिंहोदेव्याःस्ववाहनः ११ कांश्चित्क
रप्रहारेणदैत्यानास्येनचापरान् आक्रम्यचा
धरेणान्यान्सजघानमहासुरान् १२ केषांचि
त्पाटयामासनखैःकोष्ठानिकेसरी तथातलप्र
हारेणशिरांसिकृतवान्पृथक् १३ विछिन्नबाहु
शिरसःकृतास्तेनतथापरे पपौचरुधिरंकोष्ठा
दन्येषांधुतकेसरः १४ क्षणेनतद्बलंसर्वंक्षयं
नीतंमहात्मना तेनकेसरिणादेव्यावाहनेनाति
कोपिना १५ श्रुत्वातमसुरंदेव्यानिहतंधूम्रलो
चनं बलंचक्षपितंकृत्स्नंदेवीकेसरिणाततः १६
चुकोपदैत्याधिपतिःशुंभःप्रस्फुरिताधरः आ

ज्ञापयामासचतौ चंडमुंडौ महासुरौ २१ हे चंड
हे मुंड बलै र्बहुलैः परिवारितौ तत्रगछतगत्वा
चसासमानीयतांलघुः २२ केशेष्वाकृष्य बध्वा
वायदिवः संशयोयुधि तदाशेषायुधैः सर्वैर
सुरैर्विनिहन्यतां २३ तस्यांहतायांदुष्टयांसिं
हेचविनिपातिते शीघ्रमागम्यतांबध्वागृहीत्वाता
मथांबिकां २४ इ मा डे पु णे व के न्वं
त दे मा त्म्ये धू च व ध स र च
ज्ञप्तास्ततोदैत्याश्चंडमुंडपुरोगमाः चतुरं
गबलोपेताययुरभ्युद्यतायुधाः २ ददृशुस्तेत
तोदेवीमीषद्धासांव्यवस्थितां सिंहस्योपरिशै
लेंद्रश्रृंगेमहतिकांचने ३ तेदृष्ट्वातांसमादा

तुमुद्यमं चक्रुरुद्यताः आकृष्टचापासिधरास्तथा
न्ये तत्समीपगाः ३ ततः कोपं चकारोच्चै रंबिका
तानरीन्प्रति कोपेन चास्या वदनं मसीवर्णमभू
त्तदा ४ भ्रुकुटीकुटिलात्तस्याललाटफलका
द्द्रुतं काली करालवदना विनिष्क्रांतासिपाशिनी
५ विचित्रखट्वांगधरा नरमालाविभूषणा द्वीपि
चर्मपरीधाना शुष्कमांसातिभैरवा ६ अति
विस्तारवदना जिह्वाललनभीषणा निमग्नार
मै क्तनयना नादापूरितदिङ्मुखा ७ सा वेगेना
भिपतिता घातयंती महासुरान् सैन्ये तत्र सु
रारीणामभक्षयत तद्बलं ८ पार्ष्णिग्राहांकुशग्रा
हियोधघंटासमन्वितान् समादायैकहस्तेन मु

३८ दुर्गा. खे चिक्षेप वारणान् ९ तथैव योधं तुरगै रथं सार
थिना सह निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभै
रवं १० एकं जग्राह केशेषु ग्रीवायामथ चापरं
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ११
तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः मु
खेन जग्राह रुषा दशनैर्मथितानपि १२ बलि
नां तद्बलं सर्वमसुराणां दुरात्मनां ममर्दाभक्षय
च्चान्यानन्यांश्चाताडयत्तथा १३ असिना निहताः
केचित्केचित्खट्वांगताडिताः जग्मुर्विनाशमसुरा
दंताग्राभिहतास्तथा १४ क्षणेन तद्बलं सर्वमसुरा
णां निपातितं दृष्ट्वा चंडोभिदुद्राव तां कालीमतिभी
षणां १५ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः
१६

छादयामास चक्रैश्च मुंडश्चिद्विसहस्रशः २६ तानि
चक्राण्यनेकानि विशमानानि तन्मुखं बभुर्यथा
र्कबिंबानि सुबहूनि घनोदरं २७ ततोजहासातिरु
षा भीमं भैरवनादिनी कालीकरालवक्त्रांतर्दुर्दर्शि
दशनोज्वला २८ उत्थाय च महासिं हं देवी चंड
मधावत गृहीत्वा चास्य केशेषु शिरस्तेनासिना
छिनत् २९ अथ मुंडोभ्यधावत्तां दृष्ट्वा चंडं निपा
तितं तमप्यपातयद्भूमौ सा खड्गाभिहितं रुषा ३०
हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं मुंडं च सु
महावीर्यं दिशो भेजे भयातुरं ३१ शिरश्चंडस्य
काली च गृहीत्वा मुंडमेव च प्राह प्रचंडाट्टहास
मिश्रमभ्येत्य चंडिकां ३२ मयातवात्रोपहृतौ चं

३९ दुर्गा० डमुंडौ महासुरौः युद्धयज्ञे स्वयं शुंभं निशुंभं च ह
निष्यति २३ ऋ रु चं तावानीतौ ततो दृष्ट्वा चंड
मुंडौ महासुरौ उवाच कालीं कल्याणी ललितं चं
डिका वचः २५ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपा
गता चामुंडेति ततो लोके ख्याता देवी भविष्यसि
२५ इ मा डे पु णे व के न्वं रे वी
ता ऽ ऽ यः ७ ऋ रु च १ चंडे च निह
ते दैत्ये मुंडे च विनिपातिते बहुलेषु च सैन्येषु क्ष
यितेष्वसुरेश्वरः १ ततः कोपपराधीनचेताः शुं
भः प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामा
दिदेश ह २ अद्य सर्वबलैर्दैत्याः षडशीतिरुदा
युधाः कंबूनां चतुराशीतिर्निर्यांतु स्वबलैर्वृ

४

ना: ३ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै
शतं कुलानि धूम्राणां निर्गच्छंतु ममाज्ञया ४ का
लिका दौहृदा मौर्याः कालिकेयास्तथासुराः युद्धा
यसज्जा निर्यांतु आज्ञया त्वरिता मम ५ इत्याज्ञा
प्यासुरपतिः शुंभो भैरवशासनः निर्जगाम म
हासैन्यः सहस्रैर्बहुभिर्वृतः ६ आयंतं चंडिका
दृष्ट्वा तत्सैन्यमतिभीषणं ज्यास्वनैः पूरयामास
धरणीगगनांतरं ७ ततः सिंहो महानादमतीव
कृतवान्नृप घंटास्वनेन तन्नादमंबिका चोप
बृंहयत ८ धनुर्ज्यासिंहघंटानां नादापूरित
दिङ्मुखा निनादैर्भीषणैः काली जिग्ये विस्तार
तानना ९ तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतु

दिक्षं देवीस्थितस्तथाकालीसरोषैःपरिवारिता १०
एतस्मिन्नंतरेभूपविनाशायसुरद्विषां भवाया
मरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मेश
गुहविष्णूनांतथेंद्रस्यचशक्तयः शरीरेभ्योवि
निःक्रम्यतद्रूपैश्चंडिकांययुः १२ यस्यदेवस्यद्रू
पंयथाभूषणवाहनं तद्वदेवहितच्छक्तिरसुरा
न्योद्धुमाययौ १३ हंसयुक्तविमानाग्रेसाक्षसू
त्रकमंडलुः आयाताब्रह्मणःशक्तिर्ब्रह्माणीसा
भिधीयते १४ माहेश्वरीवृषारूढात्रिशूलवर
धारिणी महाहिवलयाप्राप्ताचंद्ररेखाविभूषणा
१५ कौमारीशक्तिहस्ताचमयूरवरवाहना यो
द्धुमभ्याययौदैत्यानंबिकागुहरूपिणी १६

तथैव वैस्नवी शक्तिर्गरुडोपरि संस्थिता शंखचक्र
गदाशार्ङ्गखड्गहस्ताभ्युपाययौ १८ यज्ञवाराहम
तुलं रूपं या विभ्रतो हरेः शक्तिः साभ्याययौ तत्र वा
राहीं विभ्रती तनुं १९ नारसिंही नृसिंहस्य विभ्र
ती सदृशं वपुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसं
हति २० वज्रहस्ता तथैवैंद्री गजराजोपरिस्थिता
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा २१ त
तः परिवृतस्ताभिरीशानो देवशक्तिभिः हन्यंता
मसुराः शीघ्रं मम प्रीत्याह चंडिकां २२ ततो देवी
शरीरात्तु विनिष्क्रांतातिभीषणा चंडिकाशक्ति
रत्युग्रा शिवाशतनिनादिनी २३ सा चाह धूम्र
जटिलमीशानमपराजिता दूत त्वं गच्छ भगवन्

४९ दुर्गा॰ पार्श्वे शुंभनिशुंभयोः २३ श्रुत्वा शुंभं निशुंभं च दा
नवावतिगर्वितौ ये चान्ये दानवास्तत्र युद्धाय स
मुपस्थिताः २४ त्रैलोक्यमिन्द्रो लभतां देवाः संतु
हविर्भुजः यूयं प्रयात पातालं यदि जीवितुमिच्छ
थ २५ बलावलेपादथ चेद्भवंतो युद्धकांक्षिणः
तदा गच्छत तृप्यंतु मच्छिवाः पिशितेन वः २६ अर
रु वै यतो नियुक्तो दौत्येन तया देव्याः शिवः
स्वयं शिवदूतीति लोकेस्मिन्ततः सा ख्यातिमाग
ता २७ तेपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासु
राः अमर्षापूरिता जग्मुर्यतः कात्यायनी स्थिता
२८ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः
ववर्षुरुद्धतामर्षास्तां देवीममरारयः २९ ३०

सा च तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् चि
च्छेद लीलया ध्मात धनुर्मुक्तैर्महेषुभिः ३० तस्या
ग्रतस्तथा काली शूलपातविदारितान् खट्वांगपो
थितांश्चारीन्कुर्वती व्यचरत्तदा ३१ कमंडलुज
लाक्षेपहतवीर्यान्हतौजसः ब्रह्माणी चाकरोच्छ
त्रून्येन येन स्म धावति ३२ माहेश्वरी त्रिशूलेन
तथा चक्रेण वैष्णवी दैत्याञ्जघान कौमारी तथा
शक्त्यातिकोपिना ३३ ऐंद्रीकुलिशपातेन शतशो
दैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रव
र्षिणः ३४ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ३५ ३७
नखैर्विदारितांश्चान्यान्भक्षयंती महासुरान्

४२ दुर्गा. नारसिंहिचचाराजौनादापूरितदिङ्मुखा ३८ चंड
ट्टहासैरसुराः शिवदूत्यभिदूषिताः पेतुः पृथिव्यां
पतितांतांश्चखादाथसातदा ३९ इति मातृगणं
क्रुद्धंमर्दयंतंमहासुरान् दृष्ट्वाभ्युपायैर्विविधै
र्नेशुर्देवारिसैनिकाः ४० पलायनपरान्दृष्ट्वादै
त्यान्मातृगणार्दितान् योद्धुमभ्याययौक्रुद्धोरक्त
बीजोमहासुरः ४१ रक्तबिंदुर्यदाभूमौपतत्यस्य
शरीरतः समुत्पततिमेदिन्यांतत्प्रमाणोमहासुरः
४२ युयुधेसगदापाणिरिंद्रशक्त्यामहासुरः त
तश्चैंद्रीस्ववज्रेणरक्तबीजमताडयत् ४३ कुलि
शेनाहतस्याशुतस्यसुस्राव शोणितं समुत्तस्थु
स्ततोयोधास्तद्रूपास्तत्पराक्रमाः ४४ यावंतः पति

तास्तस्यपतितारक्तबिंदवः तावंतःपुरुषाजातास्त
द्वीर्यबलविक्रमा ४३ तेचापियुयुधुस्तत्रपुरुषा
रक्तसंभवाः समंमातृभिरत्युग्रशस्त्रपातातिभीष
णं ४४ पुनश्चवज्रपातेन क्षतमस्यशिरोयदा ववा
हरक्तंपुरुषास्ततोजाताःसहस्रशः ४५ वैष्णवीस
मरेचैनंचक्रेणाभिजघानह गदयाताडयामासऐं
द्रीतमसुरेश्वरं ४६ वैष्णवीचक्रभिन्नस्यरुधिरस्रा
विसंभवैः सहस्रशोजगद्व्याप्तंतत्प्रमाणैर्महासु
रैः ४७ शक्त्याजघानकौमारीवाराहीचतथासि
ना माहेश्वरीत्रिशूलेनरक्तबीजंमहासुरं ४८
सचापिगदयादैत्यःसर्वाएवाहनत्पृथक् मातॄः
कोपसमाविष्टोरक्तबीजोमहासुरः ४९ तस्याहत

५३ दुर्गा० स्वकुक्षिधाशक्तिश्शूलादिभिर्भुवि पपात यो वै रक्तौ
घस्तेनासञ्छतशोसुराः ५२ ५० तैश्चासुरासृक्सं
भूतैरसुरैः सकलं जगत् व्याप्तमासीत्ततो देवाः
भयमाजग्मुरुत्तमं ५१ ५३ तान्विषण्णान्सुरान्दृष्ट्वा
चंडिका प्राहसत्वरा उवाच कालीं चामुंडे विस्तरं
वदनं कुरु ५२ ५४ मच्छस्त्रपातसंभूतान्रक्तविंदू
न्महासुरान् रक्तविंदून्प्रतीछ त्वं वक्त्रेणानेन
वेगिता ५३ ५५ भक्षयंती चर रणे तदुत्पन्नान्महा
सुरान् एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति
५४ ५६ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यंति चापरे
५७ इत्युक्त्वा तां ततो देवी शूलेनाभि
जघान तं ५५ मुखेन काली जगृहे रक्तबीजस्य
५८
रक्तबंदन ५८

शोणितं ततोसावाजघानाथगदयातत्रचंडिकां
५६ [६०] नचास्यावेदनांचक्रेगदापातोल्पिकामपि त
स्याहतस्यदेहात्तुबहुसुस्रावशोणितं ५७ [६१] यतस्त
तस्तद्वक्त्रेणचामुंडासंप्रतीछति मुखेसमुद्गताये
स्यारक्तपातान्महासुराः ५८ [६२] तांश्चखादाथचामुं
डापपौतस्यचशोणितं देवीशूलेनवज्रेणवाणै
रसिभिरृष्टिभिः ५९ [६३] जघानरक्तबीजंतंचामुं
डापीतशोणितं सपपातमहीपृष्ठेशस्त्रसंघसमाह
त ६० [६४] नीरक्तश्चमहीपालरक्तबीजोमहासुरः तत
स्तेहर्षमतुलमवापुस्त्रिदशानृप ६१ [६५] तेषांमातृ
गणोजातोननर्त्तासृङ्मदोद्धतः ६२ [६६] ...
पु रो व के न्वं र वी हा र वी व ८

९
४४ दुगी॰ रा वा विचित्रमिदमाख्यातं भगवन्भवता मम
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितं १ भूय
श्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते चकार शुंभो
यत्कर्म निशुंभश्चातिकोपनः २ ऋ उ च चका
र कोपमतुलं रक्तबीजे निपातिते शुंभो सुरे निशुं
भश्च हतेष्वन्येषु चाहवे ३ हन्यमानं महासैन्यं
विलोक्यामर्षमुद्वहन् अभ्यधावन्निशुंभोथमु
ख्ययासुरसेनया ४ तस्याग्रतस्तथा पृष्ठे पार्श्वयो
श्च महासुराः संदष्टौष्ठपुटाः क्रुद्धा हंतुं देवीमुपा
ययुः ५ आजगाम महावीर्यः शुंभोपि स्वबलैर्वृ
तः निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः
६ ततो युद्धमतीवासीद्देव्या शुंभनिशुंभयोः श

रवर्षमतीवोग्रंमेघयोरिववर्षतोः १७ चिच्छेदताञ्
छरांस्ताभ्यांचंडिकास्वशरोत्करैः ताडयामासचां
गेषुशस्त्रौघैरसुरेश्वरे १८ निशुंभोनिशितंखड्गं
चर्मचादायसुप्रभं अताडयन्मूर्ध्निसिंहंदेव्यावा
हनमुत्तमं १९ ताडितेवाहनेदेवीक्षुरप्रेणासिमु
त्तमं निशुंभस्याशुचिच्छेदचर्मचाप्यष्टचंद्रकं
२० छिन्नेचर्मणिखड्गेनशक्तिंचिक्षेपसोसुरः ता
मप्यस्यद्विधाचक्रेचक्रेणाभिमुखागतां २१ को
पाध्मातोनिशुंभोथशूलंजग्राहदानवः आयांतं
मुष्टिपातेनदेवीतच्चाप्यचूर्णयत् २२ आविध्या
थगदांसोपिचिक्षेपचंडिकांप्रति सापिदेव्यास्त्रि
शूलेनभिन्नाभस्मत्वमागता २३ ततःपरशुह

४५ दु॰ स्कंतमायंतं दैत्यपुंगवं आहत्य देवी वाणौघैरपात
यत भूतले २४ तस्मिन्निपतिते भूमौ निशुंभे भी
मविक्रमे भ्रातर्यतीव संक्रुद्धः प्रययौ हंतुमंविकां
२५ स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः भु
जैरष्टाभिरतुलैर्व्याप्याशेषं वभौ नभः २६ तमायंतं
समालोक्य देवी शंखमवादयत् ज्याशब्दं चापि धनु
षश्चकारातीव दुःसहं २७ पूरयामास ककुभो निज
घंटास्वनेन च समस्तदैत्यसैन्यानां तेजोवधविधि
धायिना २८ ततः सिंहो महानादैस्त्याजितेभमहा
मदैः पूरयामास गगनं गांतथैव दिशो दश २९ ततः
काली समुत्पत्य गगनं क्ष्मामताडयत् कराभ्यां त
न्निनादेन प्राक्स्वनास्ते तिरोहिताः ३० अट्टाट्टहास

मशिवं शिवदूती चकार ह तैः शब्दैरसुरास्त्रेसुः शुं
भः कोपं परं ययौ २३ दुरात्मंस्तिष्ठ तिष्ठेति व्याजहा
रांबिका यदा तदा जयेत्यभिहितं देवैराकाशसंस्थि
तैः २४ शुंभेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा
आयांती वह्निकूटाभा सा निरस्ता महोल्कया २५ सिं
हनादेन शुंभस्य व्याप्तं लोकत्रयांतरं निर्घातनिःस्व
नो घोरो जितवानवनीपते २६ शुंभमुक्तांछरान्दे
वी शुंभस्तत्प्रहिताञ्छरान् चिच्छेद स्वशरैरुग्रैः श
तशोथ सहस्रशः २७ ततः सा चंडिका क्रुद्धा शूलेना
भिजघान तं स तदाभिहतो भूमौ मूर्छितो निपपात ह
२८ ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः आ
जघान शरैर्देवीं कालीं केसरिणं तथा २९ पुनश्च

कृत्वा बाहूनामयुतं दनुजेश्वरः चक्रायुतेन दि
तिजः छादयामास चंडिकां २० ततो भगवती क्रु
द्धा दुर्गा दुर्गार्त्तिनाशिनी चिच्छेद तानि चक्राणि स्व
शरैः सायकांश्च तान् २१ ततो निशुंभो वेगेन गदा
मादाय चंडिकां अभ्यधावत वै हंतुं दैत्यसेनासमा
वृतः २२ तस्यापतत एवाशु गदां चिच्छेद चंडिका
खड्गेन शितधारेण स च शूलं समाददे २३ शूल
हस्तं समायांतं निशुंभममरार्द्दनं हृदि विव्याध शू
लेन वेगाविद्धेन चंडिका २४ भिन्नस्य तस्य शूले
न हृदयान्निःसृतोऽपरः महाबलो महावीर्यस्तिष्ठे
ति पुरुषो वदन् २५ तस्य निष्क्रामतो देवी प्रहस्य
स्वनवत्ततः शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि २६

ततःसिंहस्खरोदोग्रदंष्ट्राक्षुण्णशिरोधरान् असु
रांस्तांस्तथाकालीशिवदूतीतथापरान् [२७] ३५ कौमा
रीशक्तिनिर्भिन्नाःकेचिन्नेशुर्महासुराः ब्रह्माणी
मंत्रपूतेनतोयेनान्येनिराकृताः [२८] ३६ माहेश्वरीत्रि
शूलेनभिन्नाःपेतुस्तथापरे वाराहीतुंडघातेनके
चिच्चूर्णीकृताभुवि [२९] ३७ खंडंखंडंचचक्रेणवैष्ण
व्यादानवाःकृताः वज्रेणचैंद्रीहस्ताग्रविमुक्तेनत
थापरे [३०] ३८ केचिद्विनेशुरसुराःकेचिन्नष्टामहाह
वात् भक्षिताश्चापरेकालीशिवदूतीमृगाधिपैः
[३१] ३९ इ मा डे पु ले व के न्वं रे वी ता
त्म्ये सु व ८ ऋ रु च निशुंभंनिहतं
दृष्ट्वाभ्रातरंप्राणसम्मितं हन्यमानंबलंचैवशुं

४० दुर्गा॰ मः क्रुद्धोब्रवीद्वचः १ बलावलेपदुष्टे त्वं मा दुर्गे ग
र्वमावह अन्यासां बलमाश्रित्य युध्यसे यातिमानि
नी २ दे वा एकैवाहं जगत्यत्र द्वितीया काम
मापरा पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः
३ ऋ रु वं ततः समस्तास्ता देव्यो ब्रह्माणीप्रमु
खा लयं तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदां
बिका ४ दे वा अहं विभूत्या बहुभिरिह
रूपैर्यदास्थिता तत्संहृतं मयैकैव तिष्ठाम्याजौ
स्थिरो भव ५ ऋ रु व ततः प्रववृते युद्धं
देव्याः शुंभस्य चोभयोः पश्यतां सर्वदेवानामसु
राणां च दारुणं ६ शरवर्षैः शितैः शस्त्रैस्तथास्त्रै
श्चैव दारुणैः ततोयुद्धमभूद्भूयः सर्वलोकभयं

दैत्येंद्र २

करं १२ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका
बभंज तानि स्तत्प्रतिघातकर्त्तृभिः १३ मुक्तानि
तेन चास्त्राणि दिव्यानि परमेश्वरी बभंज लील
यैवोग्रंहुंकारोच्चारणादिभिः १४ ततः शरशतै
र्देवीमाच्छादयत्तसोसुरः सापितत्कुपितादेवीध
नुश्चिच्छेदचेषुभिः १५ छिन्ने धनुषि दैत्येंद्रस्तथा
शक्तिमथादद्दे चिच्छेद देवी चक्रेण तामप्यस्यकरे
स्थितां १६ ततः खड्गमुपादाय शतचंद्रं च भानुमत
अभ्यधावत तां देवीं दैत्यानामधिपेश्वरः १७ तस्या
पततएवाशुखड्गं चिच्छेद चंडिका धनुर्मुक्तैः शितै
र्बाणैश्चर्म चार्ककरामलं १८ हताश्वः सतदादैत्यश्छि
न्नधन्वा विसारथिः जग्राह मुद्गरं घोरमंबिकानिध

१८
५८ दुर्गा॰ नोद्यतः २४ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः
तथापि सोभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् २५ स
मुष्टिं पातयामास हृदये दैत्यपुंगवः देव्यास्तं चापि
सा देवी तलेनोरस्यताडयत् २६ तलप्रहाराभिह
तो निपपात महीतले स दैत्यराजः सहसा पुनरेव
तथोत्थितः २७ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थि
तः तत्रापि सा निराधारा युयुधे तेन चंडिका २८ नि
युद्धं खे तदा दैत्यश्चंडिका च परस्परं चक्रतुः प्रथ
मं सिद्धमुनिविस्मयकारकं २९ ततो नियुद्धं सु
चिरं कृत्वा तेनांबिका सह उत्पात्य भ्रामयामास
चिक्षेप धरणीतले ३० स क्षिप्तो धरणीं प्राप्य मुष्टि
मुद्यम्य वेगवान् अभ्यधावत दुष्टात्मा चंडिकानि

धरेश्वरा २६ तमायंतं ततो देवी सर्वदैत्यजनेश्वरं
जगत्यांपातयामास भित्वाशूलेनवक्षसि २७ सगता
सुपपातोर्व्यां देवीशूलाग्रविक्षतः चालयन्सकलां
पृथ्वीं साब्धिद्वीपां सपर्वतां २८ ततःप्रसन्नमखिलं
हतेतस्मिन्दुरात्मनि जगत्स्वास्थ्यमतीवाप निर्मलं
चाभवन्नभः २९ उत्पातमेघाःसोल्काय प्रागासंस्ते
शमंययुः सरितोमार्गवाहिन्यस्तथासंस्तत्रपातिते
३० ततो देवगणाःसर्वे हर्षनिर्भरमानसाः बभूवु
र्निहतेतस्मिन्गंधर्वाललितंजगुः ३१ अवादयं
स्तथैवान्ये ननृतुश्चाप्सरोगणाः ववुःपुण्यास्त
थावाताः सुप्रभोभूद्दिवाकरः ३२ जज्वलुश्चा
ग्नयःशांताःशांतदिग्जनितःस्वनाः ३३ मा

८१ श्री. ॐ मु लो व के न्द्रे रे वि स्ता म धः ९
ऋ रु च १ देव्याहतेतत्रमहासुरेंद्रे सेंद्रासुराव
ह्निपुरोगमास्तां कात्यायनींतुष्टुवुरिष्टलाभाद्विका
शिवक्त्राब्जविकाशिताशाः १ देविप्रपन्नार्तिहरेप्र
सीदप्रसीदमातर्जगतोखिलस्य प्रसीदविश्वेश्वरी
पाहिविश्वंत्वमीश्वरीदेविचराचरस्य २ आधार
भूताजगतस्त्वमेकामहीस्वरूपेणयतःस्थितासि
अपांस्वरूपस्थितयात्वयैतदाप्यायतेकृत्स्नमलं
घ्यवीर्ये ३ त्वंवैष्णवीशक्तिरनंतवीर्याविश्वस्य
वीजंपरमासिमाया संमोहितंदेविसमस्तमेतत्त्वंवै
प्रसन्नाभुविमुक्तिहेतुः ४ विद्याःसमस्तास्तवदेवि
भेदाःस्त्रियःसमस्ताःसकलाजगत्सु त्वयैकया

पूरितमंबयैतत्कात्वे स्तुतिस्तव्यपरापरोक्तिः ५ सर्व
भूता यदा देवी स्वर्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये
का वा भवंतु परमोक्तयः ६ सर्वस्य बुद्धिरूपेण ज
नस्य हृदि संस्थिते स्वर्गापवर्गदे देवि नारायणि न
मोस्तु ते ७ कलाकाष्ठादिरूपेण परिणामप्रदाय
नि विश्वस्योपरतौ शक्ते नारा० ८ सर्वमंगलमां
गल्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबिके गौरि
नारा० ९ सृष्टिस्थितिविनाशानां शक्तिभूते सना
तनि गुणाश्रये गुणमये नारा० १० शरणागतदी
नार्तपरित्राणपरायणे सर्वस्यार्तिहरे देवि नारा०
११ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि कौ
शांभःक्षरिके देवि नारा० १२ त्रिशूलचंद्राहिधरे

५-दुर्गा- महावृषभवाहिनि माहेश्वरीस्वरूपेण नारा० १३
मयूरकुकुटवृते महाशक्तिधरेनघे कौमारीरूपसं
स्थाने नारा० १४ शंखचक्रगदाशार्ङ्गगृहीतपरमायु
धे प्रसीदवैष्णवीरूपेनारा० १५ गृहीतोग्रमहाचक्रे
दंष्ट्रोद्धृतवसुंधरे वाराहरूपिणि शिवेनारा० १६
नृसिंहरूपेणोग्रेणहन्तुं दैत्यान्कृतोद्यमे त्रैलोक्य
त्राणसहितेनारा० १७ किरीटिनिमहावज्रे सहस्र
नयनोज्वले वृत्रप्राणहरे चैंद्रे नारा० १८ शिव
दूतीस्वरूपेणहत दैत्यमहाबले घोररूपेमहारावे
नारा० १९ दंष्ट्राकरालवदने शिरोमालाविभूष
णे चामुंडेमुंडमथनेनारा. २० लक्ष्मीलज्जेमहा
विद्येश्रद्धेपुष्टिस्वधेध्रुवे महारात्रिमहाविद्येनारा० २१

मेधेसरस्वतिवरेभूतिबाभ्रवितामसि नियतेत्वंप्र
सीदेशोनारायणिनमोस्तुते २२ [२३] सर्वस्वरूपेसर्वे
शेसर्वशक्तिसमन्विते भयेभ्यस्त्राहिनोदेविनारा
२३ [२४] एतत्तेवदनंसौम्यंलोचनंत्रयभूषितं पातुनः
सर्वभीतेभ्यःकात्यायिनिनमोस्तुते २४ [२५] ज्वालाक
रालमत्युग्रमशेषासुरसूदनं त्रिशूलंपातुनोभी
तेभद्रकालिनमोस्तुते २५ [२६] हिनस्तिदैत्यतेजांसिस्व
नेनापूर्ययाजगत् साघंटापातुनोदेविपापेभ्यो
नःसुतानिव २६ [२७] असुरसृग्वसापंकचर्चितस्तेक
रोज्वलः शुभायखड्गोभवतुचंडिकेत्वांनतावयं
२७ [२८] रोगानशेषानपहंसितुष्टा रुष्टातुकामान्सक
लानभीष्टान् त्वमाश्रितानांनविपन्नराणांत्वामा

५१ दुर्गा॰ श्रिता ह्याश्रयतां प्रयांति २८ एतत्कृतं यत्कदनं त्वया
द्य धर्मद्विषां देवि महासुराणां रूपैरनेकैर्बहुधा
त्ममूर्तिं कृत्वांबिके तत्प्रकरोति कान्या २९ विद्या
सु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या
ममत्वगर्तेतिमहांधकारे विभ्रामयस्येतदतीव विश्वं
३० रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबला
नि यत्र दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं
परपासि विश्वं ३१ विश्वेश्वरि त्वं परिपासि विश्वं वि
श्वात्मिका धारयसीति विश्वं विश्वेशवंद्या भवतीभ
वंति विश्वाश्रया ये त्वयि भक्तिनम्राः ३२ देवि प्रसीद
परिपालय नोरिभीते र्नित्यं यथासुरवधादधुनैव
सद्यः पापानि सर्वजगतां च शमं नयाशु उत्पातपाक

जनितांश्चमहोत्पसर्गान् ३३ प्रणतानांप्रसीदत्वंदेवि
विश्वार्त्तिहारिणि त्रैलोक्यवासिनामीड्यलोकानांव
रदाभव ३४ दे वा वरदाहंसुरगणावरंयन्मन
सेछथ तंवृणुध्वंप्रयछामिजगतामुपकारकं ३७
दे ऊ सर्वाबाधाप्रशमनंत्रैलोक्यस्याखिलेश्व
रि एवमेतत्त्वयाकार्यमस्मद्वैरिविनाशिनं ३९ दे
वु च वैवस्वतेंतरेप्राप्तेअष्टाविंशतिमेयुगे शुं
भोनिशुंभश्चैवान्याउत्पत्स्येतेमहासुरे ४१ नंदगो
पगृहेजातायशोदागर्भसंभवा ततस्तौनाशयि
ष्यामिविंध्याचलनिवासिनी ४२ पुनरप्यतिरौद्रे
णरूपेणपृथिवीतले अवतीर्यहनिष्यामिवैप्र
चित्तांश्चदानवान् ४३ भक्षयंत्याश्चतानुग्रान्वै

५२ दुर्गा॰ पुनरपि चातिरौद्रेण रूपेण पृथिवीतले अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान्
भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ४४
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकां ४५
भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा ४६
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ४७
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ४८
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरं ४९
दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ५०

रक्षांसिभक्षयिष्यामिमुनीनांत्राणकारणात तदा
मांमुनयःसर्वेस्तोष्यंत्यानम्रमूर्त्तयः [५८] ४७ भीमादे
वीतिविख्यातंतन्मेनामभविष्यति यदारुणाख्य
स्त्रैलोक्येमहाबाधांकरिष्यति ४८ [५२] तदाहंभ्रामरं
रूपंकृत्वासंख्येयषट्पदं त्रैलोक्यस्यहितार्थायव
धिष्यामिमहासुरं [५३] ४९ भ्रामरीतिचमांलोकास्तदा
स्तोष्यंतिसर्वतः इत्थंयदायदाबाधादानवोत्थाभ
विष्यति [५४] ५० तदातदावतीर्याहंकरिष्याम्यरिसंक्ष
यं [५५] ५१ इ मा र्कं पु णे व के न्वं रे वी
मा त्म्ये या लि ति: ११ दे वा [१] एभिः
स्तवैश्चमांनित्यंस्तोष्यतेयःसमाहितः तस्याहंस
कलांबाधांशमयिष्याम्यसंशयं १ [२] मधुकैटभना

षांचमहिषासुरघातनं कीर्त्तयिष्यंतियेतद्वद्वधं
शुंभनिशुंभयोः २ अष्टम्यांच चतुर्द्दश्यां नवम्यांचै
कचेतसः श्रोष्यंतिचैवयेभक्त्यामममाहात्म्यमुत्तमं
३ नतेषांदुष्कृतंकिंचिद्दुष्कृतोत्थानचापदः भ
विष्यतिनदारिद्र्यंनचैवेष्टवियोजनं ४ शत्रुतो
नभयंतस्यदस्युतोवानराजतः नशस्त्रानलतोयौ
घात्कदाचित्संभविष्यति ५ तस्मान्ममैतन्माहात्म्यं
पठितव्यंसमाहितैः श्रोतव्यंचसदाभक्त्यापरंस्वस्त्य
यनंहितत् ६ उपसर्गानशेषांस्तुमहामारीसमु
द्भवान् तथात्रिविधमुत्पातंमाहात्म्यंशमयेन्मम ७
यत्रैतत्पठ्यतेसम्यङ्नित्यमायतनेमम सदानत
द्विमोक्ष्यामिसान्निध्यंतत्रमेस्थितं ८ बलिप्रदाने

पूजायामग्निकार्ये महोत्सवे सर्वं ममैतच्चरितमु
च्चार्यं श्राव्यमेव च ॥१९॥ जानताजानतावापि बलिपू
जां तथा कृतां प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृ
तं ॥२०॥ शरत्काले महापूजा क्रियते या च वार्षिकी त
स्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥२१॥ सर्वा
बाधाविनिर्मुक्तो धनधान्यसमन्वितः मनुष्यो मत्प्र
सादेन भविष्यति न संशयः ॥२२॥ श्रुत्वा ममैतन्माहा
त्म्यं तथा चोत्पत्तयः शुभाः पराक्रमं च युद्धेषु जाय
ते निर्भयः पुमान् ॥२३॥ रिपवः संक्षयं यांति कल्याणं
चोपपद्यते नंदते च कुलं पुंसां माहात्म्यं मम शृण्व
तां ॥२४॥ शांतिकर्म्मणि सर्वत्र तथा दुःस्वप्नदर्शने ग
हपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥२५॥ उप

५४ दुर्गा॰ सर्गाःशमं यांति ग्रहपीडाश्च दारुणाः दुःस्वप्नं च नृभिर्दृ
ष्टं सुस्वप्नमुपजायते १६ बालग्रहाभिभूतानां बाला
नां शांतिकारकं संघातभेदे च नृणां मैत्रीकरणमुत्त
मं १७ दुर्वृत्तानामशेषाणां बलहानिकरं परं रक्षो
भूतपिशाचानां पठनादेव नाशनं १८ सर्वं ममैतन्मा
हात्म्यं मम सन्निधिकारकं पशुपुष्पार्घधूपैश्च गंधदी
पैस्तथोत्तमैः १९ विप्राणां भोजनैर्होमैःप्रोक्षणीयैरहु
र्निशं अन्यैश्च विविधैर्भोगैःप्रदानैर्वत्सरेणया २०
प्रीतिर्मे क्रियते सास्मिन्सकृत्सुचरिते श्रुते श्रुतं हरति
पापानि तथारोग्यं प्रयच्छति २१ रक्षां करोति भूते
भ्यो जन्मनां कीर्तिनं मम युद्धेषु चरितं यन्मे दुष्टदै
त्यनिबर्हणं २२ तस्मिन्श्रुते वैरिकृतं भयं पुंसां न जा

यत्ते युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः
२३ ब्रह्मणा च कृतायास्तु प्रयछंति शुभां मतिं अ
रण्ये प्रांतरे वापि दावाग्निपरिवारितः २४ दस्युभि
र्वा वृतः शून्ये गृहीतो वापि शत्रुभिः सिंहव्याघ्रानु
यातो वा वने वा वनहस्तिभिः २५ राज्ञा क्रुद्धेन चाज्ञप्तो
वध्यो बंधगतोपि वा आघूर्णितो वा वातेन स्थितः पो
ते महार्णवे २६ पतत्सु चापि शस्त्रेषु संग्रामे भृशदा
रुणे २७ सर्वाबाधासु घोरासु वेदनाभ्यर्दितोपि वा
स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् २८ मम
प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा दूरादेव पला
यंते स्मरतश्चरितं मम २९ ऋ उ च ३० इत्युक्त्वा
सा भगवती चंडिका चंडविक्रमा पश्यतां सर्वदेवानां

५५ दुर्गा· तथैवांतरधीयतै ३१ तेपि देवा निरातंकाः स्वाधिका
रान्यथापुरा यज्ञभागभुजः सर्वे चक्रुर्विनिहतार
यः ३२ दैत्याश्च देव्या निहते शुंभे देवरिपौ युधि
जगद्विध्वंसनि तस्मिन्महोग्रे तुल्यविक्रमे ३२ नि
शुंभे च महावीर्ये शेषापातालमाययुः एवं भगव
तीदेवी सा नित्यापि पुनः पुनः ३३ संभूय कुरुते भू
प जगतः परिपालनं तयैतन्मोह्यते विश्वं सैव वि
श्वं प्रसूयते ३४ सा याचिता च विज्ञानं तुष्टा ऋद्धिं
प्रयच्छति व्याप्तं तयैतत्सकलं ब्रह्मांडं मनुजेश्वरी ३७
महाकाल्या महाकाले महामारीस्वरूपया सैव
काले महामारी सैव सृष्टिर्भवत्यजा ३६ स्थितिं क
रोति भूतानां सैव काले सनातनी भवकाले नृणां

सैव लक्ष्मीर्वृद्धिप्रदा गृहे ३९ सैवाभावे तथालक्ष्मीः
विनाशायोपजायते स्तुता संपूजिता पुष्पैर्धूपगंधा
दिभिस्तथा ४० ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा
शुभां ४१ ५ मा डे पु रा व के न्व रे
वी हा प न्ये तीनं १२ ऋ रु च
एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमं एवंप्रभा
वा सा देवी ययेदं धार्यते जगत् १ विद्या तथैव क्रि
यते भगवद्विष्णुमायया तया त्वमेष वैश्यश्च तथै
वान्ये विवेकिनः २ मोह्यंते मोहिताश्चैव मोहमेष्यं
ति चापरे तामुपैहि महाराज शरणं परमेश्वरीं
३ आराधिता नृणां सैव भोगस्वर्गापवर्गदा मा
र्कं य वा इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ४

५६ दुर्गा॰ प्रणिपत्य महाभागं तमृषिं शंसितव्रतं निर्विण्णोति
ममत्वेन राज्यापहरणेन च ५ जगाम सद्यस्तपसे
स च वैश्यो महामुने संदर्शनार्थं मंबाया नदीपु
लिनसंस्थितः ६ स च वैश्यस्तपस्तेपे देवीसूक्तं
परं जपन् तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिम
हीमयीं ७ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नित
र्पणैः निराहारौ यतात्मानौ तन्मनस्कौ समाहि
तौ ८ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितं
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ९ परि
तुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका १० दे॰ वा॰ २५
यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दनं मत्तस्
तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् ११ मा॰ डे॰ २७
२६

१८ ११
ये वा नतो वद्वैन्नपो राज्यमविभ्रंस्यन्पुजन्मा
नि अवैव च निजं राज्यं हृतप्रातु बलं बलात्
१२ २० सो पि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः
ममेत्यहमिति प्राज्ञः संगविच्युतिकारकं १३ ११ दे
व्युच २१ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्य
ते भवान्. हत्वारिपूनस्खलितं तव तत्र भवि
ष्यति १४ २२ मृतश्च भूयः संप्राप्य जन्म देवाद्विव
स्वतः सावर्णिको नाम मनुर्भवान्भुवि भविष्य
ति १५ ५ वैश्यवर्य त्वया यश्च वरस्मत्तोभिवांछि
तः तं प्रयच्छामि संसिद्धौ तव ज्ञानं भविष्यति १६ २४
मा ऋ उ च २५ इति दत्वा तयोर्देवी यथाभिल
षितं वरं बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टु

५८ दुर्गा ता २९ ९७ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः २८ २९
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ९८
इ मा र्के पु णे व के न्व रे वी म
सुर वै यो र दा ना त्र द ध्या १३
इति नवार्णे जपितव्या । अथ देवीसूक्तः ॐ अहं रु
द्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः
अहं मित्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्वि
नोभा १ अहं सोममाहनसं बिभर्म्यहं त्वष्टारमु
त पूषणं भगं अहं दधामि द्रविणं हविष्मते सुप्राव्ये
यजमानाय सुन्वते २ अहं राष्ट्री संगमनी वसू
नां चिकितुषी प्रथमा यज्ञियानां तां मा देवा व्यदधुः
पुरुत्रा भूरिस्थात्रां भूर्यावेशयंती ३ मया सो

मन्नमत्ती यो विपश्यती यः प्राणिति य ई शृणोत्यु
क्तं अमंतवो मांत उप क्षयंति श्रुधि श्रुद्धिवंते द
दामि ४ अहमेव स्वयमिदं वदामि जुष्टं देवेभि
रुत मानुषेभिः यं कामये तं तमुग्रं कृणोमि तं ब्रह्मा
णं तमृषिं तं सुमेधा ५ अहं रुद्राय धनुरा तनोमि
ब्रह्मद्विषे शरवे हंतवा उ अहं जनाय समदं कृणो
म्यहं द्यावापृथिवी आविवेश ६ अहं सुवे पितर
मस्य मूर्द्धन्मम योनिरप्स्वंतः समुद्रे ततो वि
तिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोपस्पृशा
मि ७ अहमेव वात इव प्रवाम्यारभमाणा भुव
नानि विश्वा परो दिवा पर एना पृथिव्यैतावती म
हिमाना संबभूव ८ इति देवीसूक्तं। वा. नमो देव्यै

५० दुर्गा॰ तावत् ।सर्वौषदोभक्तिविनम्रमूर्त्तिभिरंतैजपित्वा
ॐ ग घा न ऋ रु च ऐंद्रस्येवशरास
नस्यदधतीमध्येललाटंप्रभांशौक्लींकांतिमनु
ष्णगोरिवशिरस्यातन्वतीसर्वतः एषासौत्रिपुरा
हृदिद्युतिरिवोष्णांशोःसदाहःस्थिताछिंद्यान्नःसह
सापदैस्त्रिभिरघंज्योतिर्मयीवाङ्मयी १ यामात्रा
त्रिपुषीलतातनुलसत्तन्तुस्थितिस्पर्द्धिनी वाग्बी
जेप्रथमेस्थितातवसदातांमन्महेतेवयं शक्तिः
कुंडलिनीतिविश्वजननीव्यापारबद्धोद्यमांज्ञा
त्वेत्थंनपुनःस्पृशंतिजननीगर्भेर्भकत्वंन
राः २ दृष्ट्वासंभ्रमकारिवस्तुसहसाऐऐइति
व्याहृतंयेनाकूतवशादपीहवरदेबिंदुंविनाप्य

तरं तस्यापिध्रुवमेवदेवितरसायातेतवानुग्रहे
वाचःसूक्तिसुधारसद्रवमुचोनिर्यांतिवक्त्रोदरा
त् ३ यन्नित्येतवकामराजमपरंमंत्राक्षरंनि
ष्कलंतत्सारस्वतमित्यवैतिविरलःकश्चिद्बुध
श्चेद्भुवि आख्यानंप्रतिपर्वसत्यतपसोयत्कीर्त्त
यंतोद्विजाःप्रारंभेप्रणवास्पदप्रणयतींनित्योच्च
रंतिस्फुटं ४ यत्सद्योवचसांप्रवृत्तिकरणेदृष्टप्र
भावंबुधैस्तार्त्तीयंतदहंनमामिमनसात्वद्बीजवें
दुप्रभं ऊस्त्रैवीविसरस्वतीमनुगतोजाड्यांबुवि
च्छित्तयेगौःशब्दोगिरिवर्त्ततेसुनियतंयोगंविना
सिद्धिदः ५ एकैकंतवदेविबीजमनघंसव्यंजना
व्यंजनंकूटस्थंयदिवापृथक्क्रमगतंयद्वास्थितं

५९ दुर्गा॰ कुक्रमात् यंयंकाममुपैत्य येनविधिनाकेनापि
वाचिंतितंजपंवासफलीकरोतितत्रक्षातंतंसमस्तं
नृणां ६ वामेपुस्तकधारिणीमभयदांसाक्षस्र
जंदक्षिणेभक्त्यैभ्योवरदानपेशलकरांकर्पूर
कुंदोज्वलां उज्जृंभांबुजपत्रकांतनयनांस्नि
ग्धाप्रभालोकिनीयेत्वामंबनभावयंतिमनसा
तेषांकवित्वंकुतः ७ येत्वांपांडुरपुंडरीकप
टलस्पष्टाभिरामप्रभांसिंचंतीममृतद्रवैरि
वशिरोध्यायंतिमूर्ध्निस्थितां अश्रांतंविकट
स्फुटाक्षरपदानियांतिवक्राम्बुजात्तेषांभार
तिभारतीःसुरसरित्कल्लोललोलोर्मिवत् ८
येसिंदूरपरागपुंजपिहितांत्वत्तेजसाद्यामिमा मु
घा

वीचापि विलीनपावकरसप्रस्तारमग्नामिव प
श्यंति क्षणमप्यनन्यमनसस्तेषामनंगज्वरं क्लां
तास्त्रस्तकुरंगशावकदृशो वश्या भवंति स्त्रियः ८
चंचत्कांचनकुंडलांगदधरामाबद्धकांचीस्रजं
ये त्वां चेतसि तद्गते क्षणमपि ध्यायंति कृत्वा स्थिरां
तेषां वेश्मसु विभ्रमादहरहस्फारीभवंत्यश्चिरं मा
द्यत्कुंजरकर्णतालतरलाः स्थैर्यं भजंते श्रियः ९
आर्भट्या शशिखंडमंडितजटाजूटां नृमुंडस्रजं
बंधूकप्रसवारुणांबरधरां प्रेतासनाध्यासिनीं
त्वां ध्यायंति चतुर्भुजां त्रिनयनामापीनतुंगस्त
नीं मध्ये निम्नवलित्रयांकिततनुं त्वद्रूपसंवित्तये
१० जातोऽप्यल्पपरिच्छदे क्षितिभुजां सामान्यमा

६ दुर्गी. त्रैकुले निपुणेशबादानिचक्रवर्त्तिपदवीलब्ध्वाप्र
तापोन्नतः यद्विद्याधरवृंदवंदितपदः श्रीवत्सरा
जोभवद्देवि त्वच्चरणांबुजप्रणतियः सोयंप्रसादोदयः
१२ चंडित्वच्चरणांबुजार्चनकृते बिल्वीदलोल्लुं
ठनाः त्रुट्यत्कंटककोटिभिः परिचयं येषांनजग्मुः
कराः ते दंडांकुशचक्रचापकुलिशश्रीवत्सम
त्स्यांकितैर्जायंते पृथिवीभुजः कथमिवांभोजप्र
भैःपाणिभिः १३ विप्राः क्षोणिभुजो विशस्तदितरे
क्षीराज्यमधुसर्वैस्त्वांदेवि त्रिपुरे परापरकलां
संतर्प्य पूजाविधौ यांयां प्रार्थयते मनः स्थिरधि
यांतेषांत एव ध्रुवं तांतां सिद्धिमवाप्नुवंति तरसा
विघ्नैरविघ्नीकृताः १४ शब्दानांजननीत्वमत्रभु

वन्ने वाग्वादिनीत्युच्यते त्वत्तः केशववासवप्रभृतयो
प्याविर्भवंति ध्रुवं लीयंते खलु यत्र कल्पविरमे ब्रह्मा
दयस्तेप्यमी सा त्वं काचिदचिंत्यरूपमहिमा शक्तिःपरा
गीयसे १५ देवानां त्रितयं त्रयी हुतभुजां शक्तित्र
यं त्रिस्वरास्त्रैलोक्यं त्रिपुष्करमथ त्रिब्रह्मवर्णास्त्रयः त्रिपदी
यत्किंचिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गादिकं त
त्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्वतः १६ ल
क्ष्मीं राजकुले जयं रणमुखे क्षेमंकरीमध्वनि क्रू
व्याद द्विपसर्पभाजि शबरीं कांतारदुर्गे गिरौ भूत
प्रेतपिशाचजंभकभये स्मृत्वा महाभैरवीं व्यामो
हे त्रिपुरां तरंति विपदस्तारां च तोयप्लवे १७ माया
कुंडलिनी क्रिया मधुमती काली कलामालिनी मा

६२ दुर्गा· तं गी विजया जया भगवती देवी शिवा धूम्रं भवी मा
हेशिः शंकरवल्लभा त्रिनयना वाग्वादिनी भैरवी ह्रीं
कारी त्रिपुरा परा परमयी माता कुमारीत्यसि १८ आ
ई पल्लवितैः परस्परयुतै र्द्वि त्रिक्रमाद्यक्षरैः काद्यैः
क्षांतगतैः स्वरादिभिरथ क्षांतैश्च तैः सस्वरैः नामा
नि त्रिपुरे भवंति खलु यान्यत्यंतगुह्यानि ते तेभ्यो भै
रवि पंचविंशतिसहस्रेभ्यः परेभ्यो नमः १९ बोधव्या
निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं भारत्या
त्रिपुरेत्यनन्यमनसो यत्राद्यवृत्ते स्फुटं एकद्वित्र
पदक्रमेण कथितस्तत्पादसंख्याक्षरैर्मंत्रोद्धार
विधिर्विशेषसहितः सत्संप्रदायान्वितः २० सावद्यं
निरवद्यमस्तु यदि वा किं वानया चिंतया नूनं स्तो

त्रमिदं पठिष्यति जनो यस्त्वामिभक्तिस्त्वयि संचिंत्या
पि लघुत्वमात्मनि दृढं संजायमानं हठात् त्वद्भक्त्या
मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवं २१ आ
नंदोद्भवकंपलुलितनयनं निद्राहहासादिकं वेदव्या
कल्पि वगाहनकरी सौभाग्यसिद्ध्येकं वश्याकर्षपुर
प्रवेशाकवितानकौतुमुक्तिप्रदं लक्ष्मीजाप्यमिदं करो
ति सततं योगीश्वरस्य ध्रुवं २२ गौरी त्वं विकपत्निपार्व
ति सति त्रैलोक्यमातः शिवे शार्वाणि त्रिपुरे भवानि व
रदे रुद्राणि कात्यायनि भीमे भैरवि चंडिके शर्वरि क
ले कालहृदये शूलिनि त्वत्पादप्रणतानऽनन्यमनसः
पर्याकुलान्पाहि नः २३ आर्द्रमवल्लरजनीचरविं
दुनादमेकाक्षरं परिमितः क्रमकावदंति मंत्रंप्रियेन

६२ दुर्गा· भुवनत्रयमंकितंच सृष्टिस्थितिप्रलयहेतुमचिंत्य
रूपं २४ यदि पठति जगत्त्रैपुरं मंत्रराजं भवति मु
क्तिपिंडसर्वदाक्षींद्रजैता इदमपि कविमात्रंमसत्तमा
तंगगंडाच्युवमदजलौघः पिंछलेहृदयदेशे २५ इ
ति ह्रीं य रा ल स्तुति मा १ ॐ अस्य श्री
इंद्राक्षीस्तोत्रमंत्रस्य पुरंदरऋषिरनुष्टुप्छंदः इं
द्राक्षी देवता लक्ष्मीः बीजं भुवनेश्वरी शक्तिः भवानी
कीलकं मम सकलकामना सिद्ध्यर्थे जपे विनियोगः
ॐ ह्रां इंद्राक्ष्यै अंगुष्ठाभ्यां नमः ॐ ह्रीं महालक्ष्म्यै त
र्जनीभ्यां नमः ॐ ह्रूं माहेश्वर्यै मध्यमाभ्यां नमः ॐ
ह्रैं अंबुजाक्ष्यै अनामिकाभ्यां नमः ॐ ह्रौं कात्यायन्यै
कनिष्ठिकाभ्यां नमः ॐ ह्रः कौमार्यै करतलकरपृष्ठा

य्यां नमः एवं हृदयादि पंचसु ॐ भूर्भुवः स्वरोम
इति दिग्बंधनं अथ ध्यानं ॐ इंद्राणीं द्विभुजां देवीं
पीतवस्त्रद्वयान्वितां वामहस्ते वज्रधरां दक्षिणे च
वरप्रदां १ इंद्राणीं युवतीं सुतलां पाशांकुशधरां प
रां प्रसन्नवदनां भोजां मणसेगणसेवितां २ सह
स्रनेत्रां सस्यीशांनानालंकारभूषितां त्रैलोक्यमोहि
नी देवीं भवानीं प्रणमाम्यहं ३ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः
इति मंत्र पि ६ वा ॐ इंद्राणी नाम सा देवी
दैवतैः समुदाहृता गौरी शाकंभरी देवी दुर्गानाम्ने
ति विश्रुता १ कात्यायनी महादेवी चंडघंटा महा
तपा गायत्री सा च सावित्री ब्रह्माणी ब्रह्मवादिनी
२ इंद्राणी इंद्ररूपा च इंद्रशक्तिपरायणा नारा

६२ दुर्गा॰ यणीभद्रकालीरुद्राणीकृष्णपिंगला २ अग्निज्वा
लारौद्रमुखीकालरात्रीतपस्विनी मेघश्यामासह
स्राक्षीविकरालीलंबोदरी ४ महोदरीमुक्तकेशी
घोररूपामहाबला वैष्णवीचमहाविद्याविष्णुमा
याजलोदरी ५ अद्रिजाभद्रजानंदारोगहंत्री
शिवप्रियाशिवदूतीकरालीचप्रत्यक्षापरमेश्व
री ६ वाराहीनारसिंहीचभीमाभैरवनादिनी
श्रुतिःस्मृतिर्धृतिर्मेधाविद्यालक्ष्मीःसरस्वती ७
अनंताविजयापर्णामानस्तोकापराजिता भवा
नीपार्वतीदुर्गाहैमवत्यंबिकाशिवा ८ त्रिनेत्रा
त्रिपुरासंध्यासर्वाणीमेनिकात्मजा चंडीभग
वतीभद्रासिद्धिबुद्धिसमन्विता ९ एतैर्नामपदै

देवीस्तुताप्राक्केणधीमता ध्यातमावर्तयेद्यस्तु
च्यतेव्याधिबंधनात् १० आवर्त्तनसहस्रेणलभ
तेवांछितंफलं इंद्रेणकथितंसम्यक्तस्मात्मेवनसं
शयः ११ यदिवांछितंमनुष्याणांलभतेनात्रसं
शयः सर्वसिद्धिमवाप्नोति इंद्रादीनामकीर्ति
नात् १२ इ श्री हुं य रा इं द्री त्र पू
र्णम् ॐ ग ध्या न । ॐ अस्य श्रीज्वालामु
खीमंत्रस्यवैश्वानरऋषिरनुष्टुप्छंदः श्रीज्वा
लामुखीदेवता ह्रीं बीजं श्रीं शक्तिःस्वाहाकीलकं
मम श्रीधर्मार्थकाममोक्षार्थेजपेविनियोगः वै
श्वानरऋषयेनमः शिरसि अनुष्टुप्छंदसेनमः
मुखे श्रीज्वालामुखीदेवतायेनमः हृदि ह्रीं बीजा

ज्वामु॰ यनमः नाभौ श्रीं घ्रां क्रैं यै नमः गुह्ये स्वाहा कालिका
यै नमः पादयोः मम श्री धर्मार्थ काम मोक्षार्थे ज
पे विनियोगः ओं ह्रीं श्रीं अंगुष्ठाभ्यां नमः ज्वाला
मुखी तर्जनीभ्यां नमः मम शत्रुन् मध्यमाभ्यां नमः
भक्षय भक्षय अनामिकाभ्यां नमः हुं कनिष्ठकाभ्यां
नमः फट् स्वाहा करतलकरपृष्ठाभ्यां नमः एवं
हृ या पं सु स्म धा ज्वालांपर्वतसंस्थितां
त्रिनयनां पीठत्रयाधिष्ठितां ज्वालाडंबरभूषितां
सुवदनां नित्यां महेश्वराजनैः षट्चक्रां भुजम
ध्यगां वरसरोजाभयान्वि भ्रांती चिद्रूपां सकला
र्थदीपनकरीं ज्वालामुखीं नौम्यहं १ उद्यच्छ्रितक
रांबुसन्निभमुखीं मापीनतुङ्गस्तनीं सघ्नःस्तुलं

सरोजपाशममलं वामे करे बिभ्रती मध्ये भीतिवरौ

र वल्लि विलसत्क्षामांगयष्टिपरां रक्ताभ्रस्य त्रिकोण

मध्यविगतां ज्वालामुखीमाश्रयेत् २ ॐ ज्वाला

मुखि विद्महे विघ्नदे जगद्भक्षिण्यै धीमहि तन्नो ज्वाला

प्रचोदयात् ॐ ह्रीं श्रीं ज्वालामुखी मम शत्रून् भक्ष

य भक्षय हुं फट् स्वाहा ॐ मालेमाले महामालेस

र्वशक्तिस्वरूपिणी चतुर्वर्गस्त्वयि न्यस्तस्मान्मे

सिद्धिदा भव १ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्म म

त्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्व

रि १ हि ना उ च ॐ यत्कर्म धर्म निलयं

प तिकृतं मया यत्नादि कं तदखिलं सफलं त्वयैव

त्वं तनायत इति प्रवि-चार्य चित्ते नित्येत्व कीयच

६५ दुर्गा॰ र्गेशरणंप्रपद्ये १ पाथोधिनाथतनयापतिरेषशेष
पर्यङ्ककलालितवपुः पुरुषः पुराणः त्वन्मोहपाशविव
शोजगदेवशेपिव्याघूर्णिमाननयनः शयनंचका
र २ तत्कौतुकंजनतियस्यजनार्दनस्य कर्णप्र
सूतमलजौमधुकैटभाख्यौ तस्यापियोनभवतं
मुलभौपहंतुं त्वन्माययाकवलतौ विलयंगतौतौ
३ यन्माहिषंवपुरपर्वबलोपपन्नं यन्नाकनायक
पराक्रमजित्वरंच यल्लोकशोकजननंतवनवद्ध
हार्दं तल्लीलयैवदलितंगिरिजेभवत्या ४ योधूम्र
लोचनइतिप्रथितःपृथिव्यां भस्मीवभूवसमरेत
वहुंकृतेन सर्वासुरक्षयकरेगिरिराजकन्ये म
न्येमुमन्मथदहनेकृतयेनमोमः ५ केषांमपिरक्षा

Courtesy Dr. Narinder Sharma. Digitized by eGangotri

नायकपूर्विकानां जेतुं न जानु कुलभाविति चंडमुंडौ
तो दुर्म दौ नु पयमांवर तुल्यमूर्त्तिः मातस्त्वामिकुल
घातयतितौ विभूतिर्यौ ६ दौत्येन ते स्थित इति प्रथितः
प्रभावो देवोपि दानवपते मदनं जगाम भूयोपि तस्य
चरितं पृथिया चकार सत्वं प्रसीद शिवदूति विजंभ
वैते ७ चित्रं पदेति ममरेर विपयेन जेया शास्त्राभि
वातपत्तितादधिरप्पपर्गी भूमौ बुभूवुरमिताप्र
विरक्तवीजासो स्तत्वयैव गिरिलतावदनै समस्ताः ८
ग्रासव्यपि मतदखिलं यदिवासुरारी त्रैलोक्यमेव भ
वविलुंठन मुष्टिपाणि सद्यैः नितस्य भुविशुंभनि
शुंभसंज्ञौ न त्वौ त्वया जननितादपि नाकलोकं ९
त्वत्तैजसी प्रलयकालहुताशनेस्मिन्यस्मिन्प्रयां

निखिलयं भुवनातिसघ्रः तस्मिन्निपत्य सलभा इव प्रा
नवेगाः भस्मी भवंतीह भवानि किमत्र चित्रं ९ तत्किं
गणामि भवति भवती वृताप निर्वृत्ति प्राणप्रणयनि
प्रणामजनेषु तत्किंगणामि भवति भवती प्रताप
संवर्द्धन प्रणयनी विपदि स्थितेषु १० वामे करेन
दितरे च तथोपरिष्टात्त्वां चेंसु धारसयुतं वरमानु
लिंगं खेटगवा च दधती भवति भवानीं ध्यायेत
ये करणानि भौक्तुतनस्तथैव ११ यदि वारुणास
रमिदं जगदंबयस्ते बीजं स्मरेदनुदिनं दहिना
धिरूढं मायांकितः तिलिकनं तरुलोंड विंवं नादेर
तिंद्र मिहराज्यमसौ भुनक्ति १२ ज्यावारु नं ज
यनवर्णिनम ग्निकोत्र कर्मा पीणंतवविसर्जनम

त्रदेवी मोहान्मया कृतमिदं सकलापराधं मातः क्षम
स्व वरदे वहिरंतरस्थे २४ अंतःस्थिताप्यखिलजं
तुभुत्वं स्वरूपा विद्योतसे वहिरिहाखिलवस्तुरूपा का
रुरिपूंव रचनारचनातिगासी हीनं जनं जननिमाम
वनिस्पयंतं २५ त्वत्तस्तदेदनुदिनं दनुजानिकारी
चंडीचरित्रमखिलंभुवयस्त्रिकालं श्रीमान्मुखी
स्तुविजयी प्रभगः क्षमीस्याच्चयागीच्चिरंतनवपुःकु
विचक्रवर्त्ती २६ श्रीसिद्धनाथप्रणताभिधेयःश्री
संभुनाथोभुवनैकनाथः तस्यप्रसादात्कुलभाग
मच्छ्रीपृथ्वीधरःस्तोत्रमिदंचकार २७ ह्रीं श्री ऊँ
ऊँ पु ऐं डी रि ह हं श्री लो य मः ऊँ
भगवतीपादपंकजं भ्रमरभूतसुरासुरसेवितं स

	بیل	قیصر [illegible]	۱۹۵۴ [illegible]	[illegible]
[illegible] قرض حسنہ	بیل	[illegible]	۱۹۶۳ [illegible]	[illegible]
	بیل	[illegible]	۱۹۶۱ [illegible]	[illegible]
	[illegible]	[illegible]	۱۹۶۲ [illegible]	[illegible]
	[illegible]	[illegible]	۱۹۶۳ [illegible]	[illegible]

[illegible]

राम राम
राम राम
राम नाम

[illegible]

सरमजी १३२५//

